# तृतीयोऽध्यायः

## (१) काव्यतत्त्वनिरूपणम्

(क) काव्यस्योद्भवः

संस्कृतवाङ्मये भाषाद्वयं समुपलभ्यते वैदिकी लौकिकी च । अनेन कारणेन संस्कृतं द्वैविध्यं श्रूयते । उभयोः भाषयोः संस्कृतस्य विकासः नवीनोद्भवश्च प्राप्यते । वैदिकसंस्कृते आर्षग्रन्थाः अपौरुषेयग्रन्थाश्च प्राप्यन्ते । अपौरुषेयेषु वेदाः आर्षग्रन्थेषु च वेदोत्तरकालस्य ग्रन्थाः स्वीक्रियन्ते ।

अद्यत्वे यानि शास्त्राणि उपलब्धानि सन्ति तेषामुद्भवः वैदिकसाहित्यादेवाजायत । अस्य परम्परातिमहनीया गभीरा च वर्तते । यतोहि वेदाङ्गनामुद्भवः वेदादेव उपजायते – यथा –

शिक्षा–कल्प–निरुक्त–व्याकरण–छन्द–ज्योतिषम्

कैश्चित् विद्वद्भिः वेदाङ्गेषु काव्यशास्त्रमपि सप्तमाङ्गरूपेण स्वीक्रियते । तेषामादिमः राजशेखरोऽस्ति , तेनोक्तं यत् –

"सप्तमी साहित्यविद्या इति यायावरीयः"

अनेन निश्चीयते यत् काव्यमपि षडङ्गसदृशम् चतुर्विधपुरुषार्थ–प्राप्तिजनकमिति । अत एव काव्यस्योद्भवः विकासः कस्माज्जायते? इत्यस्मिन् विषयेऽत्र विचार्यते ।

वैदिकसाहित्यस्याध्ययनेन ज्ञायते यत् संहिताग्रन्थेषु विशेषेण ऋग्वेदस्य मन्त्रेषु काव्यतत्त्वानां बीजम् उपलभ्यते । काव्यस्य बीजमपि काव्यतत्त्वरूपेण अधोलिखितमन्त्रे संदृश्यते –

यदेषां श्रेष्ठं यदरिप्रमासीत्प्रेणा तदेषां निहितं गुहाविः ।[1]

अत्र भाष्यकारैः अमूर्तधारणायाः धारणा अवधारिता । अत्रैव काव्यव्याख्या व्याख्यायते । यस्य कस्यापि अमूर्तस्य स्थूलरूपेण उपादानमाध्यमेन अस्माभिः परिभाष्यते । अनेन कारणेन काव्यकल्पना पुरुषरूपेण स्वीक्रियते । अधोलिखितमन्त्रेऽपि अनेकैराचार्यैः स्वस्वशास्त्राधारेण व्याख्यायन्ते । तद्यथा –

चत्वारि शृंगा त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति
महो देवा मर्त्यां आ विवेश ॥[2]

सायणमतम् – अस्य मन्त्रस्य व्याख्या सायणेन अग्निसूर्ययोः सन्दर्भे कृता । पतञ्जलिमतम्– पतञ्जलिना वृषभरूपेण निरूपणं कृतम् । राजशेखरमतम्– परञ्च राजशेखरेण अस्य मन्त्रस्य व्याख्या काव्यपुरुषरूपेण च कृतास्ति ।

ऋवेदेऽपि उपमारूपकातिशयोक्त्यार्थान्तरन्यासाद्यलंकाराः शृंगारादीनां रसानामपि उदाहरणानि समुपलब्धानि । ऋग्वेदः प्रायेण सर्वेषां शास्त्राणामुद्भवभूमिरूपेण विद्वद्भिः अभिमन्यते परञ्च काव्यस्य लक्षणग्रन्थरूपे नैव विद्यते तथापि ऋग्वेदे काव्यशास्त्रस्य नैकेषु स्थलेषु उदाहरणमाधिक्यरूपेण सम्प्राप्यते । प्रथमे हि ऋग्वेदे कतिपयानि संवादसूक्तानि प्राप्तानि सन्ति । अन्ये च भुक्षुसूक्तं, अक्षसूक्तञ्चेत्यादीनि । पुरुरवोर्वश्योः अनयोः प्रणयगाथा पुराणेतिहासेषु आख्यानरूपेण विद्यते । सैव गाथा कालिदासः विक्रमोर्वशीयनाटकरूपे विकसति । भरतोऽपि प्रथमतः काव्यपाठं ऋग्वेदात् स्वीकरोति स्म –

[1] ऋग्वेदे १०/७२/१
[2] ऋग्वेदे ४/५८/३

जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च ।

यजुर्वेदादभिनयान् रसानाथर्वणादपि ॥[१]

वाल्मीकिरामायणे न केवलं नवरसानामुल्लेखः प्राप्यते अपितु अलंकाराणाम् अन्यानां काव्यशास्त्रीयतत्त्वानां निरूपणं सम्यग्रूपेण प्राप्यते । अनेन कारणेन सिद्धं भवति यत् काव्यशास्त्रस्य निरूपणं प्राचीनकालादेव अजायत । ईसा प्रागेव सहस्रद्वयवर्षपूर्वमेव काव्यस्योद्भवः जातः । परञ्च तात्कालिकग्रन्थाः नैव समुपलब्धाः ।

काव्यशास्त्रपरम्पराविषये कुत्रापि प्रमाणिककथा नैव उपलभ्यते । वेदेषु, वैदिकसाहित्ये, व्याकरणदर्शनादिशास्त्रेष्वपि च नैव प्राप्यते । परञ्च राजशेखरेण काव्यमीमांसायां विषयेऽस्मिन् विस्तरेण चर्चा कृतेति । काव्यपुरुषोत्पत्तिः नटराजशंकरेण सह योजयति । तेन आख्यानमाध्यमेन काव्यस्योत्पत्तिर्विषये निरूपणं क्रियते ।

यायावरीयमते प्रथमतः शङ्करः मानसजातशिष्येभ्यः काव्यस्य उपदेशः दत्तवान् । काव्यशास्त्रं अष्टादशाधिकरणेषु विभज्य प्रत्येकाधिकरणोपरि एकमेकं ग्रन्थमलिखत् । अस्मिन् ग्रन्थे काव्यविधायाः विविधानामङ्गानामुल्लेखः सम्प्राप्यते । यथा –

तत्र कविरहस्यं सहस्राक्षः समाम्नासीत् औक्तिकमुक्तिगर्भः,

रीतिनिर्णयं सुवर्णनाभः, अनुप्रासिकं प्रचेतायन, यमकानि,

चित्रं चित्राङ्गदः, शब्दश्लेषं शेषः, वास्तवं पुलस्त्यः,

---

[1] नाट्यशास्त्रे १/१७

औपम्यमौपनायनः, अतिशयं पाराशरः, अर्थश्लेषमुतथ्यः
उभयालङ्कारिकं कुबेरः, वैनोदिकं कामदेवः, रूपकनिरूपणीयं
भरतः, रसाधिकारिकं नन्दिकेश्वरः, दोषाधिकरणं धिषणः,
गुणौपादानिकमुपमन्युः, औपनिषदिकं कुचुचमारः इति ।[१]

अष्टादशसु आचार्येषु भरतनन्दिकेश्वरावन्यतमौ स्तः । तयोः ग्रन्थाः समुपलभ्यन्ते सम्प्रति किन्तु अन्येषां आचार्याणां ग्रन्थाः नैवोपलब्धाः सन्ति ।

इममाधारीकृत्य काव्यस्योद्भावना अनेकैराचार्यैः उद्भाविता । काव्यशब्दस्य निष्पत्तिः काव्यतत्त्वनिरूपणं काव्यविकासादीनां विषयेषु अनेकेषु ग्रन्थेषु प्राप्यते ।

(ख) काव्यविकासः

जगत्यस्मिन् यस्य कस्यापि वस्तोः प्रादुर्भावः भवति तस्य षड्भावविकाराः अपि जायन्ते –

"जायते अस्ति विपरिणीमते वर्धते अपक्षीयते विनश्यति"

किन्तु षड्भावविकाराः स्थूलवस्तुनः भवति सूक्ष्मदृष्ट्या शब्दानामपि भावविकाराः जायन्ते । अत एव यदा काव्यतत्त्वस्य बीजं वेदात् भवति ततः परं अस्य काव्यस्य विकासः अद्यावधि प्रवहति ।

संस्कृतकाव्यस्योदयः यद्यपि प्राथम्येन राज्याश्रयेणाभवत् । राजभिः कवीन् काव्यनिर्माणाय अप्रेरयन् । अनेन राज्ञामाश्रयं प्राप्य कविभिः संस्कृतकाव्यं सर्वांशतो विकासमपि कृतमिति । संस्कृतकाव्यानि वेदं पुराणं महाभारतञ्च

---
[1] काव्यमीमांसायाम् तमे पृष्ठे १

बीजरूपेणाश्रयन्ति । प्रत्यक्षापरोक्षरूपेण वेदेषु काव्यबीजत्वं प्राप्यते मन्त्रमाध्यमेन । यथा –

प्र पर्वतानामुशतीं उपस्थादश्वे इव विषिते हासमाने ।

गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते ।[१]

अस्मिन् मन्त्रे उत्तमकाव्यस्य सर्वाणि तत्त्वानि सन्निहितानि सन्ति । अत्र शृंगारवात्सल्यरसयोरभिव्यक्तिर्भवति । माधुर्यगुणस्य उपमालंकारस्य च चमत्कारिकसौन्दर्यमपि अस्ति । एकस्मिन् मन्त्रे अतिशयोक्त्यालंकाररस्य विषये उदाहरणं उध्रीयते –

द्वा सुपर्णा सयुजा सखाया समानं वृक्षमभिष्वजाते

तयोरन्यः पिप्पलं स्वादवत्यनश्मन्नन्योऽभिचाकशीति ॥[२]

वेदेऽपि अतिशयोक्तिः दृश्यते । मन्त्रेऽस्मिन् द्वौ सुपर्णौ सयुजौ सखायौ इति लौकिकप्रयोगस्थाने छान्दसो व्यत्ययः । काव्यजगति अस्य मन्त्रस्य पौनः पुण्येन उदाहरणं प्रस्तूयते । सखायौ कौ स्तः? जीवेश्वरौ सखायौ स्तः, कथं? नित्यौ मुक्तावस्थायां समानौ संसारेण सम्बद्धौ । परञ्च द्वयोर्मध्ये किञ्चिद्भेदं वर्तते। जीवः कर्मफलं भुञ्जते तथा ईश्वरः कर्मफलमभुञ्जानो अपि प्रकाशते । कठोपनिषदि मन्त्रैकः अतीवप्रसिद्धः वर्तते उपमायाः विषये प्रयुक्तः जातः –

आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।

बुद्धिं तु सारथीं विद्धि मनः प्रग्रहमेव वा ॥[३]

---

[1] ऋग्वेदे ३/३३\१

[2] ऋग्वेदे १/१६४/२०

[3] कठोपनिषदि १/२/३

प्रायशः वेदेषु या कथाः वर्णिताः तामाधारीकृत्य नैकेषां काव्यानां रचना समजायत । महाकविना कालिदासेन विक्रमोर्वशीयं वेदवर्णिताम् । उर्वशीपुरूरवसोः प्रणयगाथां दृग्गोचरी अभूत् । वाल्मीकिना कविना हि काव्यानामादिकाव्ये स्वरामायणे करुणरसस्य या धारा प्रवाहिता सा सततं स्यन्दमाना एव स्थास्यति । तदनन्तरं अनेके कवयः नैके ग्रन्थाः अरचयन् काव्यस्य विकासः शनैः शनैः समजायत ।

(ग) संस्कृतसाहित्ये काव्यशास्त्रम्

काव्यशास्त्रस्य प्राचीनतमं नाम काव्यालंकारः एवास्ति । यस्मिन् शास्त्रे अस्य सौन्दर्यस्य पर्यालोचनं क्रियते तच्छास्त्रं काव्यशास्त्रमित्यभिधीयते । काव्यशास्त्रस्य प्रारम्भकाले एतस्मै काव्यालंकारशब्दस्य प्रयोगः क्रियते स्म । एतस्मादेव हेतोः काव्यशास्त्रस्य आदियुगस्य सर्वे आचार्याः स्वग्रन्थानां नामानि काव्यालंकार इत्याकार्षुः ।

एकादशशताब्द्याः सरस्वतीकण्ठाभरणकारो भोजदेवः काव्यशास्त्राय मुख्यरूपेण काव्यशास्त्रस्य प्रयोगं अकरोत् । किन्तु शास्त्रशब्दस्य व्युत्पत्तिमयं विधिप्रतिषेधौ अवोचत् । तथा चोक्तं तेन –

यद्विधौ च निषेधे च व्युत्पत्तेरेव कारणम् ।
तदध्येयं विदुस्तेन लोकयात्रा प्रवर्तते ॥ इति ।

तयोः विधिप्रतिषेधयोः त्रीणि साधनानि सन्ति । काव्यं, शास्त्रम्, इतिहासश्च । एतेषां त्रयाणां सम्मेलनेन अपराणि त्रीण्यपि साधनानि जायन्ते ।

काव्यशास्त्रम्, काव्येतिहासः, शास्त्रेतिहासश्च । इदमेव विधिप्रतिषेधबोधकानि षड्साधनानि भवन्ति । तथा भोजराजेन सरस्वतीकण्ठाभरणे उक्तञ्च –

काव्यं शास्त्रेतिहासश्च काव्यशास्त्रं तथैव च ।

काव्येतिहासः शास्त्रेतिहासस्तदपि षड्विधम् ॥

अनेकैराचार्यैः काव्यशास्त्रस्य नाम विविधनामभिः सम्बोध्यते । यथा – साहित्यशास्त्रम्, अलङ्कारशास्त्रम्, काव्यशास्त्रम् इत्यादीनि ।

अनेन प्रकारेण काव्यशास्त्राय साहित्यशब्दस्यापि प्रयोगः प्राचीनादेव कालात् समुपलभ्यते । अस्य साहित्यशब्दस्य प्रयोगस्त्वर्वाचीने काले अतीव प्रख्यातिमगात् काव्यशास्त्राय । चतुर्दशशताब्द्याः आचार्यो विश्वनाथः स्वकीयस्य काव्यशास्त्रविषयकस्य ग्रन्थस्य नाम अभूत् । भामहोऽपि स्वकीये ग्रन्थे प्रयोगं अकरोत् – "शब्दार्थौ सहितौ काव्यम्" इति । राजशेखरेणापि साहित्यविद्या अन्ये च क्रियाकल्पः इत्यादिभिः शब्दैः प्रयोगः कृतः काव्यशास्त्राय ।

(घ) काव्यशास्त्रस्य कालविभाजनम्

यद्यपि वैदिककालादारभ्य पाणिनिकालपर्यन्तमपि काव्यस्य तत्त्वानां विवेचनं तत्र समुपलभ्यते, किन्तु तात्कालिकी काव्यशास्त्रस्थितिः सुस्पष्टा नासीत् । काव्याशास्त्रस्य सुस्पष्टा स्थितिस्तु भरतमुनेः आरभ्यैव भवति । भरतमुनेः कालः विक्रमपूर्वस्मात् द्वितीयशताब्दारभ्य अष्टादशशताब्दं यावत् काव्यशास्त्रस्य साहित्यस्य निर्माणं सञ्जातम् ।

अलङ्कारशास्त्रस्य कालस्य विभागं विद्वांसो निम्नप्रकारेण चतुर्षु भागेषु कृतवन्तः –

१. प्रारम्भिककालः – अज्ञातकालादारभ्य भामहकालपर्यन्तमयं कालः स्वीक्रियते ।

२. रचनात्मककालः – भामहादारभ्य आनन्दवर्धनाचार्यस्य कालपर्यन्तम् । ६०० वैक्रमाब्दादारभ्य ८०० वैक्रमाब्दं यावत् ।

३. निर्णयात्मकः कालः – आनन्दवर्धनाचार्यादारभ्य मम्मटस्य कालं यावत् । ८०० वैक्रमाब्दादारभ्य १००० वैक्रमाब्दं यावत् ।

४. व्याख्याकालः – मम्मटकालादारभ्य पण्डितराजजगन्नाथस्य कालं यावत् । १००० वैक्रमाब्दादारभ्य १७५० वैक्रमाब्दं यावत् ।

एतेषां चतुर्णामपि कालानां विवेचनं क्रमशः प्रस्तूयते –

१. प्रारम्भिककालः –

काव्यशास्त्रस्य कालेषु अयं सर्वप्रथमः कालो वर्तते अयं कालः अज्ञातकालादारभ्य सप्तमं शताब्दं यावत् स्वीक्रियते । अस्मिन् काले द्वावेवालङ्कारशास्त्रस्य प्रमुखावाचार्यौ सञ्जातौ आचार्यभरतमुनिः आचार्यभामहश्च । तत्र भरतमुनिना प्रणीतं नाट्यशास्त्रं काव्यशास्त्रस्य प्राचीनतमो ग्रन्थो वर्तते । अस्मिन् ग्रन्थे आचार्यो भरतमुनिर्विस्तरेण काव्यशास्त्रस्य तत्त्वानां विवेचनम् अकार्षीत् ।

आचार्येण भामहेन प्रणीतस्य ग्रन्थस्य नाम काव्यालङ्कारो वर्तते । यद्यपि नाट्यशास्त्रं नाट्यमेवाश्रित्य प्रवृत्तं शास्त्रमास्ते किन्तु काव्यालङ्कारस्तु शुद्धरूपेण काव्यस्यैव तत्त्वानां विवेचनं प्रस्तौति ।

नाट्यशास्त्रस्य षोडशेऽध्याये चतुर्णामलङ्काराणां दशगुणानां दशदोषाणां च विवेचनं समुपलभ्यते । किन्तु काव्यालङ्कारग्रन्थे आचार्यो भामहः अष्टात्रिंशत् संख्याकानां स्वतन्त्राणामलङ्काराणां विवेचनमकार्षीत् ।

**२.** रचनात्मकः कालः –

अयं काव्यशास्त्रस्यातीवमहत्त्वपूर्णो द्वितीयः कालो वर्तते । ६०० वैक्रमाब्दादारभ्य ८०० वैक्रमाब्दं यावत् कालस्य अस्य प्रसरो वर्तते । अस्मिन् रचनात्मक एव काले काव्यशास्त्रस्य चतुर्णां सम्प्रदायानां मौलिकग्रन्थानां निर्मितिः सञ्जाता । ते च काव्यशास्त्रस्य सम्प्रदायाः सन्ति –

१. अलङ्कारसम्प्रदायः

२. रससम्प्रदायः

३. रीतिसम्प्रदायः

४. ध्वनिसम्प्रादयः

एतेषां समेषां सम्प्रदायानां मौलिकग्रन्थानां निर्मातरः अस्मिन्नेव काले समुत्पन्ना अभूवन् । तथाहि –

१. अलङ्कारसम्प्रदायस्य प्रवर्तकाः – भामहोद्भटरुद्रटाः ।

२.रीतिसम्प्रदायस्य प्रवर्तकौ – दण्डिवामनौ ।

३.रससम्प्रदायस्यप्रवर्तकाः–भट्टलोल्लटश्रीशंकुक्भट्टनायकादिकाः ।

४. ध्वनिसम्प्रदायस्य प्रवर्तकः – आचार्यः आनन्दवर्धनः ।

काव्यशास्त्रस्य दृष्ट्या कालोऽयमतीव महत्त्वपूर्णो वर्तते । यदि भामहरुद्रटोद्भटादिकाः काव्यस्य बाह्यानां तत्त्वानामुन्मीलनमकार्षुः तदा दण्डिवामनादिका अन्ये आचार्याः काव्यस्य आत्मतत्त्वनिरूपणमकार्षुः ।

**३.** निर्णयात्मकः कालः –

अयं कालः ८०० वैक्रमाब्दारभ्य १००० वैक्रमाब्दं यावत् स्वीक्रियते । अस्मिन् काले आनन्दवर्धनाचार्यस्य अनन्तरं मम्मटाचार्यस्य कालं यावत् ये

आचार्याः सञ्जाताः ते सर्वे गण्यन्ते । अस्य कालस्य प्रख्याता आचार्याः अभूवन् ध्वन्यालोकलोचनस्य अभिनवभारत्याश्च निर्माता आचार्याऽभिनवगुप्तपादाचार्यः वक्रोक्तिजीवितकारस्य प्रणेता आचार्यः कुन्तकः व्यक्तिविवेकस्य प्रणेता ध्वनिविरोध्याचार्यो महिमभट्टः । आचार्यः कुन्तको वक्रोक्तिसम्प्रदायस्य संस्थापकः आचार्यः वर्तते । व्यक्तिविवेकाभिधाने ग्रन्थे आचार्यो महिमभट्टो ध्वनिसिद्धान्तस्य आमूलचूडं खण्डनमकार्षीत् । अस्य कालस्याचार्या आसन् उद्भटः भोजराजः धनिकः धनञ्जयश्च ।

४. व्याख्याकालः –

अस्य कालस्य प्रचारः अतीव व्यापको वर्तते । १००० वैक्रमाब्दादारभ्य १७५० वैक्रमाब्दं यावत् सार्द्धसप्तशतवर्षाणां महान् कालः अस्मिन् कालेऽन्तर्भवति। अस्मिन् काले अनेके प्रख्याता आचार्याः अभूवन् । तेषु हेमचन्द्रः, आचार्यो विश्वनाथः, जयदेवश्च काव्यस्य सर्वेषामङ्गानां विवेचका अभूवन् । किन्तु रुय्यकः, अप्पयदीक्षितः प्रभृतयः आलङ्कारिकाः केवलमलङ्काराणामेव विवेचनमकार्षुः । शारदातनयः शिङ्गभूपालः भानुदत्तः प्रभृतयः विवेचकाः अस्य सिद्धान्तस्य विवेचने श्लाघनीयं प्रयत्नमकुर्वन् । राजशेखरः क्षेमेन्द्रः अमरचन्द्रः इत्यादिकाः आलङ्कारिकाः कविशिक्षामाश्रित्य स्वस्वग्रन्थानां प्रणयनं कृतवन्तः । सम्प्रदायदृष्ट्याऽपि अस्य कालस्य आचार्याणां विवेचनं कर्तुं शक्यते । तद्यथा –

१. ध्वनिसम्प्रदायस्याचार्याः – मम्मटः रुय्यकः विश्वनाथः हेमचन्द्रः विद्याधरः जयदेवः अप्पयदीक्षितश्चेत्यादयः ।

२. रससम्प्रदयस्याचार्याः – शारदातनयः, शिङ्गभूपालः, भानुदत्तः, रूपगोस्वामिदिकाश्च ।

३. कविशिक्षाया आचार्याः – राजशेखरः, क्षेमेन्द्रः, अरिसिंहः, अमरचन्द्रः, देवेश्वरादिकाश्च ।

४. अलङ्कारसम्प्रदायस्याचार्याः – पण्डितराजो जगन्नाथः, विश्वेश्वरभट्टादिकाश्च ।

(ङ) काव्यशब्दस्य निष्पत्तिः –

"कवेः कर्म काव्यम्" इत्युक्त्याधारेण कवेः चिदानन्दानुभूतिः आन्तरिकाकूतिश्चैतदुभयी जीवनरत्नद्वयी एव काव्यकलाकौशलद्वारा कविताकल्पलताकारेण परिणमन्ती मधुररसामृतफलं प्रसूते इति कविरहस्यं केचन विरला एव परमभागधेयाः सहृदया हृदयङ्गमं विदधाति यतः काव्यं नाम कवेर्हार्दभावप्रतिविम्बरूपम् हृद्गता एव भावाः परमरमणीयतया काव्येषूपनिबध्यन्ते ।

अपारे काव्यसंसारे कविरेव प्रजापति'रिति ।

तस्मात् प्रत्येकपदार्थेषु निजरचना शब्दकलाद्वारा सरसता प्रदानपुरःसरं मणिरञ्जनस्य प्रधानसाधनत्वमाधातुं चैतन्यं च विधातुं कविरेव समर्थः ।

कवृ वरणे धातोः कविशब्दस्य निष्पत्तिर्भवति कवेः कर्म इति काव्यम् इति सामन्यरूपेण स्वीक्रियते ।

(च) काव्यस्य स्वरूपम्

प्रथमेहि शब्दं विना काव्यं न भवति किन्तु कीदृशः शब्दः भवेत् तदा रसोत्कर्षकाः ये शब्दाः ते शब्दाः एव काव्यनिर्माणे योग्याः । यथा – शरीरस्य

सर्वाः क्रियाः जीवातुभूतत्त्वेन संचरति तथैव काव्यशरीरेऽपि सर्वात्मरूपेण शब्दे रसस्य अवस्थितिः अवधारणा च क्रियते । शब्दः अपि अर्थं विना न भवति । अत एव शब्दार्थौ एव काव्यम् । एतादृशी धारणा उद्भावना काव्यविषये पूर्वैः आचार्यैः कृतेति । काव्यस्य स्वरूपविषये सर्वेषां आचार्याणां काव्यशास्त्रिणां च मतं दृष्टं जातम् । सर्वैराचार्यैः स्वस्वसिद्धान्तानुसारेण काव्यस्वरूपं निर्धारितं कृतमिति । अग्निपुराणादारभ्य पण्डितराज–जगन्नाथपर्यन्तं काव्यलक्षणविषये निर्दिष्टम् । प्रथमेहि अग्निपुराणानुसारेणात्र विवेचनं क्रियते । पुराणेऽस्मिन् शास्त्रेतिहासकाव्यानि त्रीणि वाङ्मयान्तर्गते सन्निहितानि सन्ति । शास्त्रेषु शब्दस्य प्रधानता स्वीक्रियते इतिहासकाव्यग्रन्थयोः अनयोः इतिवृत्तात्मकता प्राधान्येन भवति तथा काव्ये प्रतिभायाः प्रधानता भवतीति ।

ध्वनिर्वर्णाः पदं वाक्यमित्येतद् वाङ्मयं मतम् ।

शास्त्रे शब्दप्रधानत्वमितिहासेषु निष्ठता ॥

अभिधायाः प्रधानत्वात्काव्यं ताभ्यां विभिद्यते ।[1]

अग्निपुराणदृष्ट्या इष्टार्थैः युक्तपदानां समूहः वाक्यमिति ।

सङ्क्षेपाद्वाक्यमिष्टार्थ व्यवच्छिन्ना पदावली ।[2]

अग्निपुराणमनुसृत्य आचार्य–दण्डिना काव्यादर्शे काव्यलक्षणं निर्दिश्यते–

भामहः – शब्दार्थौ सहितौ काव्यम् ।

दण्डी – शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली ।

[1] अग्निपुराण अ. ३३७ के श्लोक १.२ का उत्तरार्ध ३ का पूर्वार्द्ध
[2] अग्निपुराण अ. ३३७ के श्लोक ६ उत्तरार्द्ध

भोजराजः – निर्दोषं गुणालंकाररसवद् वाक्यं काव्यम् ।

वामनः – गुणालंकारयुतौ शब्दार्थौ काव्यम् ।

वाग्भटः – गुणालंकार–रीति–रसोपेतः साधुशब्दार्थ–सन्दर्भः काव्यम् ।

पीयूषवर्षः – निर्दोषं गुणालंकार लक्षण–रीति–वृत्तिमद्वाक्यम् ।

जयदेवः – निर्दोषा लक्षणवती सरीतिर्गुणगुम्भिता ।
सालंकाररसानेक वृत्तिर्वाक् काव्यनामभाक् ॥

कुन्तकः – शब्दार्थौ सहितौ वक्रकविव्यापार शार्लिनी ।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणी

केशवमिश्रः – रसालंकारयुक्तं सुखविशेषणसाधनं काव्यम् ।

आनन्दवर्द्धनाचार्यः – ध्वन्यात्मकं वाक्यं काव्यम् ।

क्षेमेन्द्रः – काव्यं विशिष्टशब्दार्थ–साहित्यसदलंकृति ।

मम्मटः – तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ।

विश्वनाथः – वाक्यं रसात्मकं काव्यम् ।

जगन्नाथः – रमणीयार्थः प्रतिपादकः शब्दः काव्यम् ।

सर्वैरार्चार्यैः शब्दमेव काव्यं प्राधान्यं स्वीकृतम् । किन्तु कीदृशो शब्दः काव्यं भवेदित्यत्र एव मतमतान्तरमिति । अत्रैव शब्दब्रह्मसिद्धिरजायते ।

(छ) काव्यप्रयोजनम्

"प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते" इति नीतिः रीतिः अनुसरन्तः कीटादयोऽपि प्राणिनः स्वस्य किमपि प्रयोजनमभिलक्ष्यीकृत्यैव यदा अनवरतं प्रयतमाना दरीदृश्यते तदा कृत्याकृत्यविवेकशालिनो ग्राह्याग्रह्यविवेकिनश्च मानवाः

प्रयोजनमन्तरा न किमपि कार्ये प्रवर्तन्ते । इति अयं विषयः न सचेतसां चेतसि किमपि आश्चर्यम् आदधाति । तत्रापि प्रकृष्ट फलोद्देश्यमन्तरेणाप्रवर्तमानानां प्रेक्षावताम् एतद्विषये तु कथैव का यदिह न ते तदृते कथमपि क्वचिदपि प्रवर्तन्त इति ।

अत एव परमकमनीयेऽपि काव्ये प्रविविक्षूणां प्रेक्षावतां प्रवृत्तये सर्वतः प्रथमं प्रयोजनप्रदर्शनस्य परमावश्यकत्वमभिसंदधानः । यथान्यशास्त्राणां प्रयोजनं भवति तथैव काव्यस्यापि प्रयोजनं काव्यकोविदैः प्रतिपादितम् । काव्यं हि अनर्थपरिहाराय चतुर्वर्गफललाभाय कान्तातुल्योपदेशाय कीर्तये च भवति । कविवरराजानकमम्मटः काव्यस्य षट् प्रयोजनानि प्रत्यपीपदत् –

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥[१]

काव्यस्य निर्माणं यशप्राप्तये अस्ति । यथा कालीदासादीनामिव यशः । श्रीहर्षादेधावकादीनामिव धनम् । राजादिगतोचिताचारपरिज्ञानम् । आदित्यादेर्मयूरादीनामिवानर्थनिवारणम् । सकलप्रयोजनमौलीभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दं प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मिततार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकविकर्म तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य रामादिवद्वर्तितव्यं न रावणादिवदित्युपदेशं च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम् ।[२]

---

[1] काव्यप्रकाशे. १/२

[2] काव्यप्रकाशे १/२ अस्य वृत्तिः

रससिद्धकवीनां यशः चिरस्थायी जायते । अस्य पुष्टिहेतुः महामनीषीमहाराजः भर्तृहरिः रमणीयतया प्रस्तौति स्म –

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।

नास्ति येषां यशः काये जरामरणजं भयम् ॥[१]

धनप्राप्तिनिमित्तायापि काव्यस्य रचना जायते । कविगणैः स्वाश्रयप्रदातॄणां कृतेऽपि तेषां कीर्तीनां गुणगानं सङ्कीर्त्यते । अतः अनेन फलस्वरूपेण आश्रयप्रदाता गुणगानकर्तृभ्यो अमूल्यधनराशिं प्रददाति स्म । धावकादयः अपि आश्रयप्रदातुं श्रीहर्षात् काव्यरचनां कृत्वा अतुलसम्पत्तिः प्राप्तवन्तः ।

व्यवहारपरिज्ञानप्रदानायापि काव्यस्य रचना भवति । काव्यमाध्यमेन अस्मान् राज्यव्यवस्थायाः तत्सम्बन्धीमन्त्रिणाञ्च व्यवहारस्योचितं ज्ञानं भवति । अमङ्गलनिवारणाय कल्याणकामनायै काव्यस्य निर्माणं भवति । कविना विशिष्टपदरचना द्वारा देवतानां स्तुतिः क्रियते तया प्रसन्नं भूत्वा कवेः कष्टं अपहरति । साहित्यविषये अस्योदाहरणं बहुमात्रेण समुपलभ्यते । सप्तमशताब्द्याः प्रसिद्धः कविः मयूरभट्टः कुष्ठरोगेण संपीडितः जातः तदा स्वरोगनिवृत्तये भगवतः सूर्यस्य सूर्यशतकनामकग्रन्थस्य प्रणयनं कृत्वा तेन स्तुतिः कृता । अनया दिव्यस्तुत्या प्रभावेण भास्करः प्रसन्नं भूत्वा मयूरस्य कुष्ठरोगमपहरति स्म ।

काव्यस्य मुख्यप्रयोजनमस्ति सद्यः परमानन्दस्य प्राप्तिरेव । काव्यपाठे तल्लीनं संभूय पाठकैः अलौकिकानन्दस्यानुभूयते । इयमनुभूतिरेव काव्यस्य सकलप्रयोजनमौलिभूतं प्रयोजनमस्ति ।

---

[१] नीतिशतकम् श्लोक २४

उपदेशहेतुः संक्षेपात् त्रिधा विभज्य वर्ण्यतेऽत्र प्रभुसम्मितः सुहृत्सम्मितः कान्तासम्मितश्चेति । तत्र प्रभुणा सम्मितं शब्दप्राधान्याद् आज्ञामात्रं वेदादिशास्त्रेभ्यः अर्थप्राधान्यान्मित्रेण उभयास्मिन्नपि अप्राधान्यात् कान्तया । कान्तायाः समुपदेशमपि काव्यस्य प्रयोजनेषु अन्यतमं वर्तते । अयमुपदेशः कान्तासम्मितः राजाज्ञायाः तुल्यः शब्दप्रधानः, वेदादिशास्त्रेभ्यः मित्रस्य तुल्यं अर्थप्रधानपुराणेतिहासादिभ्यः विलक्षणभावना प्रधाना च वर्तते । मधुरातिमधुरशब्दैः असन्मार्गेस्थितजनान् रामादिवत् आचरेयुः न तु रावणादिवत् ।

अनेन उपदेशेन सन्मार्गं प्रति अग्रेसारयति । इति मम्मटः प्रयोजनस्य विश्लेषणं विदधाति ।

सर्वेषामाचार्याणां काव्यप्रयोजनविषये मतैक्यं नास्ति भिन्नभिन्नरूपेण स्वीकृतवन्तः । भरतमुनिः नाट्यस्योद्देश्यानां रूपे काव्यस्य प्रयोजनानां निरूपयति । "नाट्यवेदः" इत्यस्य रचनायां प्रस्तावनया अश्यमेव काव्यस्य प्रयोजनं स्पष्टं जातम् । तस्य मते नाट्येदं उत्तममध्यमाधमाश्च मनुष्याणां कार्याणां आधारभूतमस्ति । भामहमते – उतमकाव्यस्य रचना कृते सती धर्मार्थकाममोक्षाणां प्राप्तिर्भवति । कलासु विलक्षणताया आगमनं भविष्यति । यशः आनन्दश्च सम्प्राप्यते ।

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिबन्धनम् ॥[१]

वामनेन काव्यस्य प्रयोजनद्वयं स्वीकृतं यशः आनन्दश्च –

काव्यं सद्दृष्टार्थं प्रीतिकीर्तिहेतुत्वात् ।[२]

---

[1] काव्यालङ्कारे १/२

[2] काव्यलङ्कारसूत्रवृत्तिः १/१/५

वामनः काव्यस्य दृष्टप्रयोजनम् आनन्दः अदृष्टप्रयोजनं यशः अभिमन्यते । रुद्रटमहाभागस्य मतानुसारेण चतुर्विधपुरुषार्थधर्मार्थकाममोक्षाः काव्यस्यैव प्रयोजनमस्ति । राजशेखरमते काव्यं कवीनां कीर्तिः, लोकोपयोगी विविधविषयैः विविधविद्याभिः संस्कारितं भूतकारणत्वात् सर्वेभ्यः कल्याणकारी तथा नृपर्षिदेवानां यशसः विस्तारकं भवति –

ख्याता नराधिपतयः कविसंश्रयेण राजाश्रयेण च गताः कवयः प्रसिद्धिं ।
राज्ञा समोऽस्ति न कवेः परमोपकारी राज्ञो न चास्ति कविना सदृशः सहायः ॥[१]

(ज) काव्यस्य हेतुः

काव्यरचनाकर्तॄन् जनाः कविरिति नाम्ना अवबोधयन्ति । कवेः कर्म काव्यमिति प्रसिद्धम् । काव्यस्य हेतुर्विषये समेषामाचार्याणां मतैक्यं नास्ति । आचार्यदण्डेः मतानुसारेण काव्यस्य हेतुः प्रतिभा–शास्त्रज्ञान–शाश्वताभ्यासाः एव सन्ति –

नैसर्गिकी च प्रतिभा श्रुतञ्च बहुनिर्मलम् ।
आनन्दश्चाभियोगश्च कारणं काव्यसम्पदः ॥[२]

आचार्यो वामनोऽपि विषयेऽस्मिन् दण्डेरनुयायि एवासीत् । सः प्रतिभाशब्दं प्रतिभानमितिनाम्ना व्यनक्ति इदमेव काव्यस्य बीजं स्वीक्रियते । अस्याभावे कवित्त्वस्य शक्तिः नैव स्फुटीभवति । आचार्यवामनः लोकवृत्तलोकव्यवहारं प्रकीर्णकाव्यत्त्ववृद्धसेवाम् आवश्यकमेव मन्यते –

---

[1] काव्यमीमांसायाम् पृ. ७२
[2] काव्यादर्शे १/१०३

लोको विद्या प्रकीर्णञ्च काव्याङ्गानि ॥[१]

आचार्यरुद्रटेन प्रतिभाव्युत्पत्तिरभ्यासाः इति स्वीकृताः –

मनसि सुसमाधिनी सदा विस्फुरणमनेकधाभिधेयस्य ।

आक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्तिः ॥[२]

आनन्दवर्धनाचार्यमते व्युत्पत्तिः प्रतिभा च अनयोर्मध्ये प्रतिभैव श्रेयस्करी –

अव्युत्पत्ति कृतो दोषः संव्रियते कवेः ।

यस्त्वशक्तिः कृतस्तस्य झटित्येवावभासते ॥[३]

परञ्च आचार्यकुन्तकमतं सर्वेषामाचार्याणां दृष्ट्या भिन्नं प्रतिभाति । अनेन मतेन कवेः स्वभावः एव काव्यस्य मूलकाराणमस्ति । स्वभावानुसारेण कवेः व्युत्पत्तिः भविष्यति तदनुसारेणैव कवेरभ्यासोऽपि भविष्यति । व्युत्पतिरभ्यासश्च तु केवलं प्रतिभायाः परिपोषकोऽस्ति –

"कविस्वभावनिबन्धेन काव्यप्रस्थानभेदः
समञ्जसतां गाहते । सुकुमारस्वभावस्य
कवेस्तथाविधैव सहजा शक्तिः समुद्भवति,
शक्तिमतोरभेदात् तथा च तथाविध–
सौकुमार्यरमणीयां व्युत्पत्तिमावध्नाति"[४]

काव्यप्रकाशकारेण काव्यस्य हेतुः त्रयः एव निर्दिष्टाः –

शक्तिनिपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।

काव्यज्ञ शिक्षयाभ्यास इतिहेतुस्तदुद्भवे ॥[५]

---

[1] काव्यालङ्कारसूत्रवृत्ति १/३/१

[2] रुद्रटकृतकाव्यलङ्कारः १/१५

[3] ध्वन्यालोके पृष्ठ. २४१

[4] वक्रोक्तिजीविते

[5] काव्यप्रकाशे. १/३

मम्मटेन काव्यस्य हेतुः शक्ति–प्रतिभा– बीजरूपसंस्कारविशेषः लोकव्यवहारशास्त्रं एवं काव्यादेः पर्यालोचनेन व्युत्पत्तिनिपुणताकाव्यज्ञानानाञ्च शिक्षायाः अभ्यासः एतेषां तिसृणां शक्तीनां समष्टिरूपेण काव्यस्य कारणमस्ति । पण्डितराजजगन्नाथेन तु केवलैकं काव्यस्य कारणं प्रतिभैव स्वीकृता ।

अनेन प्रकारेण संस्कृतसाहित्ये काव्यस्य हेतु विषये सम्मिलितकारणतावादस्य केवलकारणतावादस्य च कौतुकानां काव्यरसिकानां आलोचनाचक्षुभ्यः अत्यन्तरमणीयास्वाद्यं महनीयं चास्ति ।

वस्तुतस्तु कवित्त्वस्याधारस्तम्भद्वयं वर्तते दर्शनवर्णनञ्च । अनयोः परिपूर्णत्वात् सति सत्कवित्वस्योन्मेषः भवति । दर्शनस्य सम्बन्धः आन्तरिकप्रतिभया सह वर्तते वर्णनस्य सम्बन्धः शब्दार्थस्य सम्यगुपस्थित्य सह वर्तते ।

(झ) काव्यस्य भेदाः

काव्यस्य द्वौ पक्षौ स्तः अनुभूतिपक्षः अभिव्यक्तिपक्षश्च । तत्र अनुभूतिमभिव्यक्तिकर्तुं नैके मार्गास्सन्ति । कश्चित् कविः यया रीत्या स्वगतामनुभूतिं सहृदयहृदयं यावत् सङ्क्रान्तिकृत्य तान् रसे मज्जयति , तत्रैव तस्य काव्यकृतिः साकल्येन निर्भरति । तदेवमिदं सिद्ध्यति काव्यस्य दृश्यमानानां समेषामपि रूपवैविध्यानां बीजं भिन्नभिनाभिव्यक्तिपद्धततः एव विराजन्ते । कविना अभिव्यक्तिनामनुभूतिनाञ्च ग्रहणं यत् कश्चित् सहृदयः नेत्रेन्द्रियेण श्रवणेन्द्रियेण च

विदधाति । अतः इन्द्रियग्राहितामाधारीकृत्य पुनरपि प्रकारान्तरेण काव्यस्य भेदद्वयं वर्तते –दृश्यकाव्यं श्रव्यकाव्यञ्चेति । यथोक्तम् –

दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम् ।

दृश्यं तत्राभिनेयं तद् रूपारोपातु रूपकम् ॥[१]

दृश्यकाव्यम्– दृश्यकाव्यस्य सम्पूर्णं रसास्वादनं तदैव सम्भवति यदा तद्ङ्गमञ्चे अभिनीयमानं दृश्यं पश्यति स्म । इदं दृश्यकाव्यमपि रुपकोपरूपकभेदाद् द्विविधम् । वस्तुनेतृरसभेदेन रुपकस्य दश भेदास्सन्ति । दशरूपककारधनञ्जयेनोक्तं यत् –

नाटकं प्रकरणं भाणः प्रहसनं डिमः ।

व्यायोगसमवकारौ वीथ्येङ्केहामृगा इति ॥[२]

उपरूपकस्य अष्टादश भेदाः निगदिताः भरतमुनिना । श्रव्यम् – अर्थगतां रमणीयतामाधारीकृत्यैव श्रव्यकाव्यमपि उत्तम–मध्यम–अवर–प्रभृतिभेदान् विधत्ते । अनेन शैल्याधारेण श्रव्यकाव्यस्य त्रयो भेदाः विहितास्सन्ति । गद्यकाव्यम् पद्यकाव्यम् मिश्रकाव्यञ्चेति –

गद्यं पद्यं च मिश्रं च तत्त्रिधैव व्यवस्थितम् ।[३]

गद्यं पद्यं च मिश्रं च काव्यानि त्रिविधं स्मृतम् ।[४]

काव्यालङ्कारे भामहेनापि निर्दिष्टम् –

शब्दार्थौ सहितौ काव्यं गद्यं पद्यं च तद्विधा ।[५]

---

1 नाट्यशास्त्रे ३२/३८५

2 नाट्यशास्त्रे

3 काव्यादर्शः १/११

4 अग्निपुराणम् ३३७/८

5 काव्यालङ्कारः १/१६

मिश्रकाव्यम् – गद्यपद्ययोः मिश्रितशैल्या विनिर्मितं काव्यमेव मिश्रकाव्यमित्युच्यते । इदं काव्यस्यापरनाम चम्पुरित्यभिधीयते ।

गद्यम् – आद्यं गद्यम्– पद्यबद्धो रहितं गद्यम् । अस्मिन् गद्ये यतिलययोः बन्धनं नास्ति । गद्यस्यापेक्षा गद्येऽस्मिन् रमणीयतायाः उद्भावनोत्पन्नकर्तुं दुष्करकार्यं विद्यते । अत एव "गद्यं कवीनां निकषं वदन्ति" अनेन प्रमाणेन गद्यस्य महत्त्वं प्रतिपादयति । अग्निपुराणानुसारेण गद्यमपि त्रिविधं विभज्यते । चूर्णकः उत्कलिका वृत्तगन्धिश्च –

अपदः पदसन्तानो गद्यं तदपि गद्यते ।
चूर्णकोत्कलिका वृत्तगन्धिभेदात् त्रिरूपकम् ॥[१]

दण्डिमहाभागेनापि गद्यस्य इयं परिभाषा प्रदत्ता । परञ्च द्विविधभेदं स्वीकृतम् कथा आख्यायिका च –

अपादः पदसन्तानो गद्यमाख्यायिका कथा ।
इति तस्य प्रभेदी द्वौ तयोराख्यायिका किल ॥[२]

पद्यम्– छन्दोबद्धः पद्यम् । पद्यमयं काव्यस्य द्वौ भेदौ स्तः वृत्तं जातिश्च । यत्र पद्येषु केवलं नियमानुसारेण अक्षराणां गणना गण्यते तदेव वृत्तछन्दः इति कथ्यते । परञ्च यत्र मात्राणां गणना क्रियते तत्र जातिछन्दः भवति । दण्डी आचार्यः स्वग्रन्थे कथयति यच्छन्दशास्त्रस्य ज्ञानं काव्यस्वरूपार्णवं तितीर्षवे नौकावत् प्रतीयते । आचार्यभामहेन स्वरूपविधानाधारेण काव्यस्य पञ्च भेदाः स्वीकृताः । महाकाव्यं, रूपकं आख्यायिका कथा मुक्तकञ्चेति । प्रथमभेदः महाकाव्यस्यास्य लक्षणं प्रायेण

---

[1] अग्निपुराणम् ३३७/९

[2] काव्यादर्शः १/२३

सर्वैराचार्यैः निर्दिष्टम् । अस्य लक्षणं षट्कारिकाभिः भामहेन कृतमिति किन्तु यल्लक्षणं विश्वनाथेन कृतं तल्लक्षणं सर्वोत्कृष्टं सर्वमभिहितम् –

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ॥
एकवंशभवा भूपाः कुलजा बहवोऽपि वा ।
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते ॥
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः ।
इतिहासोद्भवं वृत्तमन्यद् वा सज्जनश्रयम् ॥
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकञ्च फलं भवेत् ।
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ॥
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम् ।
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ॥
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह ।[१]

विश्वनाथानुसारेण महाकाव्यं सर्गेषु विभाजितं भवेदिति । अस्य प्रमुखपात्रनायकः देवः, कुलीनवंशोत्पन्नः, क्षत्रियः, धीरोदात्तः अन्यैः गुणैरपि सुशोभते । शृङ्गारवीरशान्तादिरसेषु एको रसः अङ्गीरसो भवेदन्ये सर्वे रसाः तस्य सहायकाः भवेयुः । सर्वासां सन्धीनां वर्णनं स्यात् । महाकाव्यस्येतिवृत्तं इतिहासाश्रिताद् महापुरूषलोकविश्रुतकथायाः वा भवेयुः । परिभाषेयं विशदा परिपूर्णा चास्ति तथैव अन्यैरप्याचार्यालङ्कारिकैः नास्त्येव । अस्यां परिभाषायां इतिवृत्तं, चरित्रचित्रणं, रसाभिव्यञ्जकञ्च एतेषां त्रयाणां दृष्ट्या महाकाव्यस्य निरूपणं निरूपितम् ।

---

[1] साहित्यदर्पणे ६/३१५–३२०

आख्यायिका–

आख्यायिका गद्यस्यैकलोकप्रियरूपमस्ति । ध्वन्यालोककारेणोक्तं यत्–

गद्यबन्धेऽपि अतिदीर्घसमासा रचना न

विप्रलम्भशृङ्गारकरुणयोराख्यायिकायामपि शोभते ।

नाटकादावाप्यसमासैव सङ्घटना रौद्रवीरादिवर्णने

विषयापेक्षं त्वौचित्यं प्रमाणतोपकृष्यते प्रकृष्यते च ।[१]

आख्यायिकायां विप्रलम्भशृङ्गारस्यावयवं करुणरसस्य निबन्धनं भवति, नातिदीर्घसमासयुक्ता रचना भवेत् । अनेन प्रमाणेन नाटकोऽपि रौद्रवीररसस्य प्रकरणे दीर्घसमासयुक्तपदावल्याः प्रयोगं न भवेदिति । मुक्तकम् – मुक्तककाव्यस्य स्फुटरचना मुक्तकमिति कथ्यते । अस्मिन् कथा प्रवाहस्य किमपि बन्धनं नास्ति, अस्य प्रतिश्लोकः चमत्कारपूर्णः सहृदयान् आनन्दप्रदानम् कारयति । अग्निपुराणेऽस्य लक्षणं निर्दिष्टम् –

मुक्तकं श्लोक एकैकश्चमत्कारक्षमः सताम् ।[२]

साहित्यदर्पणे –

छन्दोबद्धपदं पद्यं तेन मुक्तेन मुक्तकम् ।[३]

यद्पद्यं पद्यानामाकाङ्क्षया निर्मुक्तं स्यात् तदेव मुक्तकम् ।

---

[1] ध्वन्यालोकः ३/९ कारिकायाः वृत्तिः

[2] अग्निपुराणम् ३३७/३६

[3] साहित्यदर्पणे ६/३१४

(२) काव्यतत्त्वविषये विभिन्नाचार्याणां मतम्

काव्यशास्त्रस्य सम्प्रदायाः प्रख्याताः सन्ति । एतेषां सम्प्रदायानां भेदस्य कारणमास्ते काव्यस्यात्मतत्त्वविषये मतभेदः । ये आचार्याः काव्यास्यात्मारूपेण रसं स्वीकुर्वन्ति ते रससम्प्रदायस्याचार्याः कथ्यन्ते । ये अलङ्कारमेव काव्यस्य मुख्यं तत्त्वं स्वीकुर्वन्ति तेऽलङ्कारसम्प्रदायस्य प्रवर्तकाः आचार्याः सञ्जाताः । ध्वनिसम्प्रदायस्य प्रवर्तका आचार्याः ध्वनिमेव काव्यस्यात्मतत्त्वं स्वीकुर्वन्ति । वक्रोक्तिसम्प्रदायस्य प्रवर्त्तकेनाचार्येण कुन्तकेन तु अभिहितम्– वक्रोक्तिरेव काव्यस्य आत्मा । रीतिसम्प्रदायस्याचार्याः रीतिरेव काव्यस्यात्मत्वेन स्वीकुर्वन्ति । औचित्यसम्प्रदायस्य प्रवर्तकानुसारेण औचित्यं काव्यजीवितमास्ते ।

(क) रससम्प्रदायस्य वर्णनम्

सृष्टेरारम्भतः रसस्य महत्त्वपूर्णं स्थानं वर्तते । अनेकेष्वर्थेषु रसशब्दस्य प्रयोगः प्रयुक्तः जातः । वैशेषिकदर्शने रसः गुणोऽस्ति यस्य ज्ञानं रसनेन्द्रियमाध्यमेन भूतम् । अस्मिन्नर्थे रसशब्दः षड्प्रकारकाः सन्ति । आयुर्वेदशास्त्रे रसः श्वेतद्रवमस्ति यः भोजनादुत्पद्यते । रसोऽयं मुख्यत्वेन हृदिरवस्थिते ।

रसशब्दस्य निष्पत्तिः

रस आस्वादने धातोः “कर्मणि घञ्” इति सूत्रेण घञ् प्रत्यये कृते सति रसशब्दस्य निष्पत्तिर्जायते । रसशब्दं नवार्थेषु प्रयुक्तो जातः ।

रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः ।
शृंगारादौ द्रवे वीर्ये देहधात्वम्बु पारदे ॥[1]

---
[1] विश्वकोशे

अस्य प्रयोगः गन्धरसे, स्वादे, तिक्तादौ, विषे, रागे, शृंगारादौ, द्रवे, वीर्ये, अम्बुपारदे च इत्यादिषु अर्थेषु भवत्येव ।

रसशब्दस्य व्युत्पत्तिः

रसशब्दः "रस्यते इति रसः" अनया व्युत्पत्या निष्पद्यतेऽयं शब्दः । यस्यार्थः आस्वाद्यमानमास्वादनं च क्रियते । व्याकरणशास्त्रानुसारेण अनेकाः व्युत्पत्यः व्युत्पद्यते । यथा –

<u>प्रथमा व्युत्पत्तिः</u>

" रस्यते आस्वाद्यते इति रसः"[1]

अत्र रसशब्दस्यार्थः परब्रह्मपरमात्मस्वरूपं रसमधुसोमगंधमधुराणि इत्यादीनर्थान् द्योतन्ते ।

<u>द्वितीया व्युत्पत्तिः</u>

" रस्यते अनेन इति रसः"

अनयाधारेण रसशब्दः गुणवीर्यरागदेहादीनां वाचकं वर्तते ।

<u>तृतीया व्युत्पत्तिः</u>

"रसति रसयतीति वा रसः"

अस्यां व्युत्पत्यां रसशब्दः धातुपारदद्रवजलादीनाम् अर्थानां बोधको भवति ।

<u>चतुर्था व्युत्पत्तिः</u>

"रसनं रसः आस्वादः" अनया व्युत्पत्याधारेण शृंगारादिरसानामर्थानां प्रतिपादनं जातम् । मुख्यत्वेन रसः अस्वादनस्यार्थः संसूच्यते । येन भावानां

---

[1] काव्यमीमांसायाम् पृ. १२–१३

आस्वादनं भवति सैव रसः इति । "आस्वाद्यावाद्रसः" आस्वाद्यात्वात् कारणात् चमत्कारयुक्तं पदार्थं रसरूपे ज्ञायते । व्युत्पत्याधारेण रसशब्दस्याभिप्रायः तेन पदार्थेण सह भवति यः आस्वाद्यं रसनीयं च भवति । काव्ये रसस्य सारभूतत्त्वात् काव्यस्यास्य आत्मेति कथ्यते । रसशब्दः आनन्दशब्स्य पर्यायवाचीशब्दः इति मन्यन्ते विद्वद्भिः ।

संस्कृतवाङ्मये शताधिकाः ग्रन्थाः रससिद्धान्तविषये समुपलभ्यते । ऋग्वेदादारभ्य काव्यशास्त्रपर्यन्तं रससिद्धान्तविषये चर्चा भूता । भारतीयवाङ्मये रसशब्दस्य प्रयोगः अनेकेषु स्थलेषु भवत्येव । ऐतिहासिककालक्रमानुसारेण अस्य शब्दस्य प्रयोगः वैदिककालतः प्रचलितः । वेदेषूपनिषत्सु रसशब्दस्य प्रयोगः पृथक् पृथक् अर्थत्वे सति प्रतिपादनं भवति । अस्योदाहरणमत्र प्रस्तूयते ।

पेयार्थे ---------------(ऋग्वेद ८/७२/३)

जलं ----------------(ऋग्. ९/६३/१३)

स्वादर्थे च ------------(ऋग्. ९/६५/१५)

इत्यादिष्वर्थेषु प्रयुक्ताः । तदनन्तरं शनैः शनैः वेदात् उपनिषत्सु शब्दस्यागमनं जातम् । रसशब्दः क्रमशः उपनिषत्स्वावश्यकतत्त्वमिति शब्दस्यार्थे –

प्राणि हि वा अंगानां रसः ।[1]

अत्यन्तसुखार्थे –

यच्चक्षुः सतो सयेष रसः ।[2]

परमात्मार्थे –

रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवति ।[1]

---

[1] ब्रह्मोपनिषद् १/३/१९

[2] ब्रह्मोपनिषद् १/३/४

इत्यादीनां शब्दानां रसार्थे बोधं भवति । उपनिषत्सु यो रसः परमात्मनः वाचकत्वमस्ति ।

एतद्धे सत्वस्य रूपं, तत्सत्वमेवरिर्तः, स सम्प्रास्रवत ।[२]

तदेव काव्ये ब्रह्मानन्दसहोदरकाव्यस्वादस्यार्थे प्रयुक्तो जातः । आयुर्वेदशास्त्रे रसशब्दः विविधानां द्रव्यानामेकीकृत्य पिष्टचूर्णरूपेण रसराजराजः मकरध्वजरसः इत्यादयः रसः कथ्यते । किन्तु काव्यशास्त्रीयदृष्ट्या अयं रसः शब्दार्थभिन्नत्वेन काव्यतत्त्वरूपेण स्वीक्रियते ।

आदिकाव्ये वाल्मीकिरामायणे बालकाण्डस्य चतुर्थसर्गे रसोल्लेखः प्रथमेहि प्राप्यते –

पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरन्वितम् ।
जातिभिः सप्तभिर्युक्तं तन्त्रीलयसमन्वितम् ॥
हास्यशृंगारकारुण्य रौद्रवीरभयानकैः ।
वीभत्सादिरसैर्युक्तं काव्यमेतदमापताम् ॥[३]

विविधानां काव्यशास्त्रकाराणां मतेन रसतत्त्वस्य निरूपणं प्रथमेहि अग्निपुराणे अपि जातम् । यतोहि संस्कृतवाङ्मयग्रन्थानां रससमीक्षणम् अग्निपुराणतः संग्रह्यैव व्याख्यारूपेण प्रस्तुतं कृतमिति । अग्निपुराणानन्तरं रसविवेचनं भरतनाट्यसूत्रात् पूर्वं वात्स्यानस्य ग्रन्थेऽपि प्राप्यते । तस्मिन् विषये कथयितुं शक्यते यत्पञ्चशताब्देः पूर्वस्मात् एव वात्स्यायनस्य व्याख्या स्वीक्रियते ।

---

[1] तैत्तिरीयोपनिषदि २/७

[2] तैत्तिरीयोपनिषदि ५/२

[3] वाल्मीकिरामायण–समीक्षितावृत्त्याम् १/४/७–८

अपि च भरतपूर्ववर्तिनः ये आचार्याः अभूवन् ते रसविवेचनं कृतवन्तः । किन्तु रसस्य विषये विस्तृतचर्चा भरतस्य नाट्यशास्त्रादेव अभूतम् इति निष्प्रचम् । नाद एव शब्दब्रह्म –

सच्चिदानन्दविभवात् सकलात् परमेश्वरात् ।

आसीच्छक्तिस्ततो विन्दुः विन्दोर्नादसमुद्भवः ॥[१]

आचार्यभरतमुनेः मतानुसारं कश्चनापि अर्थः रसं विना न भवति । उक्तं यत्–

न हि रसादृते कश्चिदप्यर्थः प्रवर्तते ।[२]

रससम्प्रदायस्यादि आचार्यः को वर्तते इति प्रश्नः अद्यापि नैव निर्णीतम् । परञ्च राजशेखरमतानुसारेण नन्दिकेश्वर एवास्य सम्प्रदायस्यादिप्रवर्तक आचार्यो वर्तते । किन्तु साम्प्रतं नन्दिकेश्वरस्य कश्चन ग्रन्थो नैव समुपलभ्यते न वा कश्चनापि सिद्धान्तः । रसविषयकः साम्प्रतं समुपलभ्यमानः प्राचीनतमो ग्रन्थो नाट्यशास्त्रमास्ते । नाट्यशास्त्रस्य षष्ठसप्तमाध्याययोः विस्तरेण रसस्य वैज्ञानिकं विवेचनं समुपलभ्यते । भरतमुनिरेव नाट्यशास्त्रस्य प्रणेता वर्तते इति सर्वमान्यः सिद्धान्तः । अत एव साम्प्रतिकैः सर्वैरेव समालोचकैः भरतमुनिरेव काव्यशास्त्रस्य प्रवर्तकः प्रथमाचार्यः स्वीक्रियते । आचार्यस्य भरतमुनेर्मुख्यमुद्देश्यं नाट्यरसस्य विवेचनमास्ते । अत एव सः अनयोरध्याययोः नाट्यशास्त्रस्य नाट्यरसस्यैव विस्तृतं विवेचनं प्रस्तौषीत् ।

रससम्प्रदायस्य नाट्यशास्त्रीयम् मूलभूतं सूत्रमास्ते – विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" । अस्य सूत्रस्य कलेवरं लघुः प्रतीयते किन्तु अस्य सूत्रस्य व्याख्या अतीवविस्तरेण कृता समालोचकैः । यद्यपि

---

[1] शारदातिलक १/७

[2] नाट्यशास्त्रे ३/३१

कस्यचन कमनीयस्य नाट्यस्यावलोकनेन कमनीयस्य अथवा काव्यस्य श्रवणेन चेतसि यः अलौकिक आनन्द उन्मीलितो भवति स एव रसशब्देन अभिधीयते । आचार्यमम्मटेन रसस्वरूपविषये उक्तम् –

कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥
विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः ।
व्यक्तः स तैर्विभावाद्यैः स्थायिभावो रसः स्मृतः ॥[1]

किन्तु अस्य रससूत्रस्य व्याख्यायां भरतपरवर्तिनः अनेकेः आचार्याः अपरिमितं स्वबुद्धिवैभवं प्रदर्शयमासुः । तेषां व्याख्यातृणां चतुर्णां मतमतीव प्रख्यातानि सन्ति । भट्टलोल्लटस्य मतम्, भट्टशङ्कुकस्य मतम्, भट्टलोल्लटस्य मतम्, भट्टनायकस्य मतम् अभिनवगुप्तपादाचार्यस्य मतञ्च एतेषामाचार्याणां मतं सङ्क्षेपेण अत्र प्रस्थाप्यते –

१. भट्टलोल्लटस्य मतम् –

आचार्यभट्टलोल्लटो रसस्य विषये उत्पत्तिवाद्याचार्यो वर्तते । अस्याचार्यस्य मतानुसारेण मुख्यतया रसस्य सम्बन्धः अनुकार्येण साकं भवति । भट्टलोल्लटस्य मतस्यानुवादमकार्षीत् । निम्नप्रकारेणाचार्यो मम्मटः स्वकीये काव्यप्रकाशाभिख्ये ग्रन्थे ।

विभावैर्ललनोद्यानादिभिः आलम्बनोद्दीपनकारणैः रत्यादिको भावो जनितः, अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः । व्यभिचारिभिः निर्वेदादिभिः

[1] काव्यप्रकाशे ४/२७–२८

सहकारिभिरुपचितो मुख्यया वृत्या रामादावनुकार्ये तद्रूपतानुसन्धानान्नर्त्तकेऽपि प्रतीयमानो रस इति भट्टलोल्लटप्रभृतयः ।[1]

भट्टलोल्लटमतस्य वैशिष्ट्यम् – अस्य मतानुसारेण स्थायिभावेन साकं विभावानां संयोगः अर्थात् उत्पाद्योत्पादकभावरूपः सम्बन्धो भवति, अनुभावानां गम्यगमकभावरूपः सम्बन्धो भवति । व्यभिचारिणां च पोष्यपोषकभावरूपः सम्बन्धो भवति ।

२. भट्टशंकुकस्य मतम् –

अयमनुमितिवादः स्वीक्रियते । भट्टलोल्लटस्योपर्युक्तमेव अन्यूनमवलोक्य आचार्यो भट्टशङ्कुकः रससूत्रस्य व्याख्यामकार्षीत् । अनेन आचार्येण रसस्य सम्बन्धं सामाजिकेन साकं संस्थापयितुम् । अस्याचार्यस्य मतानुसारेण नटः कृत्रिमतयानुभावादीनां प्रकाशनं करोति किन्तु तेषां सौन्दर्यबलात् तेषु वास्तविकता प्रतीयते । तान् कृत्रिमान् अनुभावादिकानेवावलोक्य सामाजिकः अनुकर्तरि नटे वस्तुतोऽविद्यमानस्यापि रसस्यानुमानं करोति स्ववासनापरतन्त्रश्चानुमित्यस्य रसस्यास्वादनमपि करोति ।

३. भट्टनायकस्य मतम् ।

अयमाचार्यः रसभुक्तिवाद्यासीत् । रसानुमितिवादस्योपर्युक्तमेव नैयून्यमाकलय्य रससूत्रस्य व्याख्या आचार्यो भट्टनायकः अकार्षीत् । सामाजिकानां सञ्जायमानायाः साक्षात्कारात्मिकायाः रसानुभूतेः उपपादनाय एकं

[1] काव्यप्रकाशे पृ. ६६

नूतनमेव पन्थानमाश्रयते स्म  भट्टनायकस्य व्याख्या संस्कृतसाहित्यशास्त्रे भुक्तिवादस्य नाम्ना प्रसिद्ध्यते ।

४. अभिनवगुप्तपादस्य मतम् ।

आचार्योऽयम् अभिव्यक्तिवादी वर्तते । आचार्योऽभिनवगुप्तः स्वकीया रससूत्रव्याख्या आनन्दवर्धनाचार्यस्य रसाभिव्यक्तिवादमाश्रित्य करोति स्म । अत एव तस्य मतम् आलङ्कारिकसमवाये समादृतो बभूव ।

रसस्य विषये आलङ्कारिकाणामभिप्रायो वर्तते यत् येन वस्तुना संसारे शोकोऽथवा भयं जायते क्रोधो वा उत्पद्यते तदेव वस्तु काव्ये वर्णितं सदलौकिकं रूपं दधाति । तेनाऽपि जायते आनन्दोद्बोधः, अस्मादेव कारणात् भयानकरसस्याथवा करुणरसस्य काव्यनाट्ययोर्भवति सहृदयानां प्रवृत्तिः । अत एव सर्वेषु रसेषु आनन्दप्रदत्वमक्षतमेव भवति ।

रसानां संख्या–

रसानां संख्या विषये आलङ्कारिकाणां वैमत्यमास्ते । नाट्यशास्त्रकारेण भरतमुनिना अष्टौ रसाः एव स्वीकृताः । तथा च उक्तम् –

शृङ्गारहासकरुणे रौद्रवीरभयानकाः ।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ रसाः स्मृताः ॥[१]

अत एव नाट्यशास्त्रानुमताः सन्तीमे अष्टौ रसाः –१. शृङ्गाररसः,२. हास्यरसः, ३. करुणरसः,३. रौद्ररसः, ४. वीररसः, ६. भयानकरसः, ७. बीभत्सरसः, ८. अद्भुतरसश्चेति । केचन शान्ताख्यमपि नवमं रसं स्वीकुर्वन्ति । किन्तु धनञ्जयो दशरूपककारः तस्य व्याख्याकारो धनिकश्च शान्ताख्यास्य रससत्तां

[1] नाट्यशास्त्रे

नाट्ये नहि स्वीकुर्वन्ति, तस्याभिनयायोग्यत्वात् । किन्त्वभिनवगुप्तो नागानन्दनाटकस्याङ्गीरसं शान्तं स्वीकृत्य तस्यापि सत्तां नाट्ये स्थापयति ।

आचार्यो रुद्रटः प्रेयान् नामकं दशमं रसं स्वीकरोति स्वकीये काव्यालङ्कारग्रन्थे । साहित्यदर्पणकारेण विश्वनाथेन वात्सल्याभिमुख्यस्य रसस्य समर्थनं कृतं साहित्यदर्पणे । गौडीयानां वैष्णवानामनुसारेण मधुररस एव सर्वप्रधानः सर्वप्रथमश्च वर्तते । काव्यशास्त्रे रससम्प्रदायस्यातीव महत्ता वर्तते । महाकाव्ये वाल्मीकेर्मुखात् कौञ्चवधं विलोक्य निस्सृतं पद्यं रसमयमेवासीत् । अत एव समे आलङ्कारिकाः रसस्य महत्त्वं स्वीकुर्वन्ति ।

आचार्यो विश्वनाथस्तु रसमेवाह काव्यस्यात्मारूपेण । तथाहि – वाक्यं रसात्मकं काव्यमि'ति । भरतमुनिरपि काव्ये रसः प्राधान्यं स्वीकरोति। अग्निपुराणकारेणाप्यभिहितं काव्यजीवितत्त्वं रसस्य । तथाहि – वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम् इति । राजशेखरः काव्यमीमांसायां रसस्यैव काव्यात्मत्त्वं स्वीकरोति ।

(ख) अलङ्कारसम्प्रदायस्य वर्णनम्

अलङ्कारमतस्य प्रवर्तक आलङ्कारिको भामहो वर्तते । अस्य मतस्य पोषको वर्तते भामहस्य टीकाकारः उद्भटः । दण्डिरुद्रटप्रतिहारेन्दुराजाः अपि अस्यैव मतस्यानुयायिनो वर्तन्ते । दण्डिमतस्यानुसारेण काव्यस्य पोषकानि अङ्गानि अलङ्कारशब्देनाभिधीयन्ते । रुद्रटप्रतिहारेन्दुराजावपि स्वग्रन्थेषु अलङ्कारस्यैव प्राधान्यं प्रतिपादयामासतुः । अस्य सम्प्रदायस्यानुसारेणालङ्कार एव काव्यस्य जीवातुतत्त्वम् ।

चन्द्रालोककर्त्रा जयदेवेन तु अभिहितम् – यथौष्ण्यं विनाऽनलं नहि भवति तेनैव प्रकारेणालङ्कारं विना काव्यत्त्वं नायाति । तदेव–

अङ्गीकरोति यः काव्यं शब्दार्थवनलङ्कृती ।
असौ न मन्यते कस्मादनुष्णमनलङ्कृती ॥[१]

रुय्यकस्तु प्रत्यपिपदत् यत् प्राचीनालङ्कारिकमतानुसारेण अलङ्कार एव काव्ये प्रधानं तत्त्वमिति ।

अङ्कारशब्दस्य निष्पत्तिः

संस्कृतसाहित्ये अलङ्कारशब्दस्य प्रयोगः द्वावर्थौ समुपलभ्यते भावार्थे करणार्थे च । प्रथमे भावार्थे डुकृञ् धातोः क्तिन् प्रत्ययं कृत्वा अलम्+कृ+क्तिन् अलङ्कृतिरलंकारः इति भावादुत्पन्नो दोषापगमगुणाऽलङ्कारसंवलकृतसौन्दर्यपरः तत्पर्तिपाकात्वात् एव अयम् अलङ्कारः । अलम्+कृ+घञ् अलङ्कारशब्दः अलंशब्दस्यार्थः भूषणशोभावर्धकः इत्यादिषु अर्थेषु अलङ्कारः सौन्दर्येण भिन्नोऽस्ति । वामनः अलङ्कारं सौन्दर्यस्य पर्यायं मत्वा अलङ्कारयुक्तकाव्यं ग्राह्यं राहित्वात् अग्राह्यं कथितवान् ।

द्वितीयोऽर्थः करणव्युत्पत्तिर्लभ्यते –अलङ्क्रियते अनेन इति अलङ्कारः । तत्तत्त्वं यत्काव्यं अलङ्कृतं काव्यस्य सौन्दर्यतावर्धकं भवेदिति । कविराजराजशेखरेण काव्यमीमांसायायामुक्तं यत् उपकरोति अलङ्कारः सप्तममङ्गम् ।

अग्निपुराणे शब्दालङ्कारार्थालङ्कारौ विभागौ उपलभ्येते । अतः अलङ्कारशास्त्रमूलं अग्निपुराणमेवास्ति । परञ्च विवेचने शास्त्रकथनस्य गौरवं

---

[1] चन्द्रालोके १/८

दण्डिभामहः इत्यादयः विद्वान्सः कृतवन्तः । वस्तुतः अलङ्कारशास्त्रे नामकरणेन इदमेव प्रतीयते यत् दण्डी भामहः भट्टोद्भटौ रुद्रट वामनादिभिः आचार्यैः अलङ्कारसम्बन्धी रचना कृताः ।

तदेवमलङ्कारा एव काव्ये प्रधानमिति प्राच्यानां मतम् ।

अलङ्काराणां विकासः शनैः शनैः कालक्रमेण अवर्धयत । नाट्यशास्त्रस्य प्रणेता भरतमुनिः चतुर्णामेव अनुप्रासोपमादीपकरूपकाख्यानामलङ्काराणां नामनिर्देशं करोति । एतेषु एकः अनुप्रासाभिमुख्यः शब्दालङ्कारो वर्तते । अन्ये च त्रयः अर्थालङ्कारकोटौ समाविशन्ति । किन्तु कुवलयानन्दाभिमुख्ये ग्रन्थे अलङ्काराणां सङ्ख्यावृद्धिः चरमां कोटिं स्पृष्ट्वा सती पञ्चविंशत्युत्तरशतसंख्याकतां (१२५) गता । कालक्रमेणालङ्काराणां स्वरूपेऽपि महत् परिवर्तनं समभवत् । अत्र निदर्शनरूपेण वक्रोक्तिरुपस्थाप्यते

काव्यस्य सर्वस्व स्वरूपरसस्य वर्णोपरान्ते द्वितीयतत्त्वरूपेण यत्तत्त्वं स्वीक्रियते कविभिः तदेवालङ्कारः इति । अलङ्कारतत्त्वविरवरणोपक्रमे को नाम अलङ्कारः? कति विधश्च ते? इत्यादिनात्र विषयोपन्यस्यत ।

भगवतः सृष्टौ मनुष्यसृष्टिः अत्युत्तमा सृष्टिः कथ्यते । तथापि शरीरस्यापि पक्षद्वयं वर्तते बाह्याभ्यान्तररूपम् । बाह्यरूपं शरीरस्य दृष्टाङ्गानि सन्ति । आभ्यान्तररूपं शरीरस्य गुणस्वभावादि–संश्लिष्टाङ्गानि सन्ति । तथैव प्रकारेण काव्यशरीरस्यापि पक्षद्वयं स्वीक्रियन्ते –

प्रथमः भावपक्षः द्वितीयः कलापक्षश्चेति ।

यथा मनुष्यस्य शरीरे आत्मास्ति तथैवप्रकारेण काव्यशरीरस्य रसः वर्तते । यथा शरीरस्य बाह्याङ्गानि सन्ति तथैव काव्यस्य कलापक्षे अलङ्कारादिनामवस्थितिः । स्वरूपोत्कर्षकाः अलङ्काराः स्वीक्रियन्ते ।

काव्यस्य स्वरूपं शब्दार्थरूपत्वेन स्वीक्रियन्ते । अनयोः शब्दार्थयोः रसाभिव्यञ्जनं आत्मा तथैव शब्दार्थस्य वाह्यास्वरूपमाध्यमेन अलङ्काराभिव्यञ्जनं काव्यस्वरूपाधायकं भवति । यदा काव्योद्गमः जातः तदा अलङ्काराभिषिक्तकाव्यरूपमेव स्वीकृतमासीत् । अस्याः परम्परायाः अतिप्राचीनेति । वेदेष्वपि अलङ्काराणां स्वरूपस्य वर्णने नैकानि उदाहरणानि च प्राप्तानि भवन्ति । यथा ऋग्वेदे– दिङ्मात्र प्रस्तूयते –

सूर्यो देवि मुषषं रोचमाना ।[१]

अनेन प्रतीयते यत् पद्यकाव्यस्य उद्भावना अलङ्कारं विना न शोभते । अनेन कारणेन काव्यालङ्कारकारेण भामहेननापि उद्घोषितम् –

न कान्तमपि निर्भूषं विभाति वनितामुखम् ।[२]

भामहः पूर्वमपि काव्यतत्त्वरूपेण अलङ्कारं स्वीकरोति स्म । भामहतः आरभ्य जगन्नाथपर्यन्तं काव्यतत्त्वरूपेण अलङ्कारः स्वीक्रियन्ते । तर्हि अप्रतिषेधरूपेण अलंकारतत्त्वं मन्यामहे वयम् । अथात्र कः अलंकारः कति विधश्च अत्रोपस्थाप्यते । अलंकारस्य का परिभाषा? को नाम अलंकारः? विविधाचार्यमते । कति अलंकारस्य भेदाः? अलंकारः कति विधः?

क्रियाकल्पसाहित्यम्, सौन्दर्यसाहित्यम्, काव्यशास्त्रम्, अलंकारशास्त्रञ्चेति शब्दाः प्रायेण समानाभिधाननामरूपेण स्वीक्रियते ।

---

[1] ऋग्वेदे १/११/९

[2] काव्यालङ्कारे १/१३

उक्तकाव्यधारायां अलंकारदृष्ट्या भागचतुष्ट्यरूपेण विभाजनं क्रियते । ये विद्वांसः अभूवन् तच्चतुर्षु भागेषु विभजन्ते ।

<u>अलंकारशास्त्रस्य काल परम्परा</u> –

१. आदिकालः – वेदोत्तरकालतः भामहयावत् ।

२. रचनात्मककालः – भामहतः आनन्दवर्धनयावत् (६०० तः ८०० वर्षपर्यन्तम्)

३. निर्णयकालः – आनन्दवर्धनतः मम्मटपर्यन्तम् (८०० तः १००० पर्यन्तम् )

४. व्याख्यात्मको कालः – मम्मटात् पं. विश्वेश्वरपर्यन्तम् (१००० तः १७०० वर्षपर्यन्तम्)

अलंकारशास्त्रस्य विकासक्रमे ध्वनेरुद्भावना अनिन्द्याभिनवा च स्वीक्रियते सर्वैः । काव्यशरीरस्य सारभूतकाव्यतत्त्वं अलंकारः सर्वैः स्वीकृतः ।

अलंकारः कति विधः ? अलंकारशास्त्रं त्रिविधरूपेण मन्यते विद्वद्भिः।

१. शब्दालंकारः

२. अर्थालंकारः

३. उभयालंकारश्च

अग्निपुराणे त्रयाणां प्रकारकाणां अलंकाराणां समुल्लेखः सम्प्राप्यते । यत्र शब्दवैचित्र्यतायाः निरूपणं जातं सैव शब्दालंकारः तथा यत्र अर्थवैचित्यनिरूपणं भवति तदर्थालंकारः । यत्र द्वयोः शब्दार्थयोः निरूपणं भवति स उभयालंकारः इति कथ्यते ।

काव्येषु मुख्यरूपेण गौणरूपेण च अलंकाराणां विधानं कवयः कृतवन्तः । एतेषु विधानेषु अलंकाराणां स्वमेव कवयः अलंकाराणां लक्षणानुसारेण नवीनलक्ष्यस्य रचना कृतवन्तः । कुत्रचित् आचार्यैः काव्यगतलक्ष्याधारेण एव

अलंकारलक्षणानां निरूपणं च कृतमिति । स्वस्वमतानुसारेण अलंकाराणां भेदाः स्वीकृताः आचार्यैः ।

अलंकारस्य भेदाः –

भरताद् प्रारभ्य जगन्नाथपर्यन्तं पृथक् पृथक् अलङ्काराणां संख्या परिदृश्यते । अलंकारभेदविषये काव्यशास्त्रिणां मतैक्यं नास्ति । प्रथमेहि भरतेन नाट्यशास्त्रग्रन्थे शुद्धालंकाररूपेण चत्वारः अलंकाराः स्वीकृताः सन्ति । ते च –

उपमा दीपकं चैव रूपकं यमकं तथा ।
काव्यस्येते ह्यलङ्काराश्चत्वारः परिकीर्तिताः ॥[१]

यद्यपि महर्षिणा भरतेन स्वग्रन्थे षट्त्रिंशल्लक्षणानां विधानस्य प्रतिपादनं कृतम् । किन्तु तेषां तत्र लक्षणरूपेण विधानमस्ति न त्वलंकाररूपेण । चतुर्णां अलंकाराणामुदाहरणसहितं विवेचनं कृतमिति । विष्णुधर्मोत्तरपुराणे महर्षिव्यासेन अष्टादशालंकाराणां वर्णनं कृतम् । त्रयः अलंकाराः नाट्यशास्त्रे एवास्ति । पञ्चदश नवीनाः अलंकाराः सन्ति । विष्णुधर्मोत्तरपुराणे निम्नलिखिताः अलंकाराः वर्णिताः सन्ति –

व्यतिरेक–श्लेष–उत्प्रेक्षा–अर्थान्तरन्यास–
उपन्यास–विभावना–अतिशयोक्ति–वार्ता–
यथासंख्य–विशेषोक्ति–विरोध–निन्दास्तुति–
निदर्शन–अनन्वयाख्याश्चतुर्दश नवीनाः
अलंकाराः निर्दिष्टाः सन्ति ।

[1] नाट्यशास्त्रम् १६/४०

व्याकरणस्य विषये भट्टिकाव्यस्य प्रसिद्धिरासीत् यतोहि ग्रन्थेऽस्मिन् व्याकरणसम्बन्धिपदप्रयोगः अतिशयो जातः ।

दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम् ।

हस्तादर्श इवान्धानां भवेद् व्याकरणादृते ॥[१]

भट्टिस्वामिनः समयकालः ६१० ईसवी मन्तुं शक्यते । अस्मिन् काव्ये द्वाविंशतिसर्गाः येषु संहत्य १६२९ परिमिताः श्लोकाः विद्यन्ते । त्रयोदशसर्गान्तं अलंकाराणां निवेशः कृतः ।

भट्टिमहाभागैः अष्टात्रिंशत् अलंकाराः स्वीकृताः आसन् तेषामुदाहरणानि प्रदर्शितानि भट्टिकाव्ये । तदोत्तरकालीन भामहस्य समयारभते ।

भामहः

भामहस्य जन्म काश्मीरप्रदेशेऽभवत् । भामहस्य कालविषये महान् मतभेदो विद्यते । दण्डिभामहयोः कः पूर्ववर्तीति निर्णयोऽतीव दुष्करः वर्तते तथापि अनेकै विद्वद्वर्यैः मतानुसारेण षष्ठशतकमध्यवर्तित्वं मन्यते ।

भामहेन विरचितकाव्यालंकारग्रन्थस्य प्रसिद्धिः अलंकारविषये जाता । अस्मिन् ग्रन्थे भामहेन अष्टात्रिंशत् अलंकाराः निरूपिताः तेषामलंकाराणाम् उदाहरणमपि निर्दिष्टम् । उपमायाः भेदरूपेणैव प्रतिवस्तूपमालंकारस्य विवेचनमपि कृतम् । यथा –

समानवस्तुन्यासेन प्रतिवस्तूपमोच्यते ।

यथेवानभिधानेऽपि गुणसाम्यप्रतीतितः ॥[२]

---

[1] भट्टिकाव्यम् २२/२३

[2] काव्यालंकारे २/३४

अलंकारशास्त्रे भामहस्य महत्त्वपूर्णयोगदानमस्ति ।

दण्डी –

काव्यादर्शग्रन्थस्य रचयिता अलंकारशास्त्रस्य प्रसिद्धाचार्यः दण्डी अलंकारशास्त्रीयलेखकेषु स्वं विशिष्टं स्थानं धारयति । अस्य जन्मस्थानविषये कथयितुं दण्डिनः दक्षिणप्रदेशे कांचीनगरे आसीत् । दण्डिनः समयः अष्टमशतकमिति मन्यते । काव्यादर्शे चत्वारः परिच्छेदाः ६६० श्लोकाः सन्ति दण्डिनः सप्तत्रिंशदलंकाराः निरूपिताः सन्ति ।

उद्भटः –

उद्भटभट्टस्यापि प्रसिद्धि अलंकारशास्त्रेणैव वर्तते । अस्य जन्म काश्मीरप्रदेशे अभवत् । उद्भटस्य समयः अष्टमशतकस्योत्तरार्द्धभागो नवमशतकस्य पूर्वार्द्धभागश्च निश्चीयते । भट्टोद्भट्टेन काव्यालंकारसारसंग्रहस्य रचना कृतासीत् । ग्रन्थेऽस्मिन् एकचत्वारिंशदलंकाराणां निरूपणं कृतमनेन ग्रन्थकारेण ।

वामनः –

रीतिसमप्रदायस्य प्रतितिष्ठापकः अलंकारिको वामनः काश्मीरप्रदेशे जन्म अलभत् । कश्मीरनरेशस्य सचिवरूपेण नियुक्त आसीत् अयं वामनः । अस्य जन्म समयः अष्तमशतकस्यान्तिमो भागः (७८०) तथा नवमशतकस्य चरमभाग (८८०) निर्णीयते ।

वामनेन काव्यालंकारसूत्रवृत्ति इति ग्रन्थः विरचितः । अस्मिन् ग्रन्थे अलंकारशास्त्रस्य सर्वेऽपि विषयाः सूत्ररूपेण प्रतिपादिताः । पञ्चसु अध्यायेषु

विभक्ताः ३१९ सूत्राणि च सन्ति । ग्रन्थेऽस्मिन् द्वात्रिंशत् अलंकाराः निर्दिष्टाः सन्ति ।

रुद्रटः–

रुद्रटः काव्यालंकारे षट्षष्टिः अलंकाराः निरूपिताः । अग्निपुराणे एकत्रिंशत् मम्मटस्य काव्यप्रकाशे चतुःसप्ततिः, रुय्यकस्यालंकारसर्वस्वे द्व्यशीत्यलंकाराणां प्रतिपादनं जातम् । विश्वनाथेन स्वग्रन्थे साहित्यदर्पणे सप्तसप्तत्यलंकाराणां भेदप्रभेदैः सह प्रतिपादनं कृतम् । अप्पयदीक्षितोऽपि कुवलयानन्दे त्रयोविंशत्यलंकाराः प्रतिपादिताः । संस्कृतसाहित्य–गगनस्यान्तिमः देदीप्यमाननक्षत्र–पण्डितराजजगन्नाथ–जयदेव–दीक्षितयोः कतिपयानामलंकाराणां खण्डनं तथा कतिपयानां मण्डनमपि कृतवानिति ।

(ग) रीतिसम्प्रदायस्य वर्णनम्

रीतिसम्प्रदायस्य प्रधानसंस्थापको वामनो वर्तते । दण्ड्याचार्योऽपि रीतेः विस्तृतं विवेचनमकार्षीत्, किन्तु आचार्यो वामनः काव्यालङ्कारसूत्रवृत्तौ रीतेरतिमहत्त्वपूर्णं स्थानं प्रादात् । तेनाभिहितं स्पष्टं यत् – रीतिरात्मा काव्यस्ये'ति । काव्यस्यात्मभूतायाः रीतेः स्वरूपं किमास्ते इत्यनुयोगे आचार्यो वामनः प्राह – विशिष्टपदरचना रीतिः । विशेषो गुणात्मा । एतस्मादेव कारणात् रीतिसम्प्रदायस्यापरं नाम गुणसम्प्रदायोऽपि भवति ।

गुणानां सर्वप्रथमं वर्णनम् आचार्यो भरतमुनिरकरोत् । स दशप्रकारकाणां काव्यार्थगुणानां वर्णनं नाट्यशास्त्रे अकार्षीत् । ते च गुणाः सन्ति – श्लेषः,

प्रसादः, समता, समाधिः, माधुर्यम्, ओजः, सुकुमारता, अर्थव्यक्तिः, औदार्यम् कान्तिश्च । तथा चोक्तमपि भरतमुनिना –

श्लेषः प्रसादः समता समाधिर्माधुर्यमोजः पदसौकुमार्यम् ।
अर्थस्य च व्यक्तिरुदारता च कान्तिश्च काव्यार्थगुणा दशैते ॥[1]

यद्यपि आचार्यो दण्डी भरतोक्तान् गुणान् स्वीचकार किन्तु भरताद् भिद्यते । दण्डिकृता गुणानां व्याख्या । आचार्यो दण्डी गुणानां शब्दगतत्वरूपमर्थरूपञ्च भेदं नहि स्वीकरोति स्म । स एतान् गुणान् वैदर्भमार्गस्य प्राणभूतान् स्वीकरोति ।

आचार्यो वामनोऽपि भरतोक्तान् दश काव्यगुणान् स्वीकृतवान्, किन्तु सः गुणानां व्याख्या नवीनतया अकार्षीत् । स गुणानां द्वैविध्यं स्वीकरोति – शब्दगतत्त्वमर्थगतत्त्वञ्च । उपर्युक्ताः समे दश गुणाः शब्दगताः अर्थगताश्च भवन्ति । अतः तेषां नामसु तु शब्दगतत्वे अर्थगतत्वे च नहि भवति कश्चनापि भेदः किन्तु स्वरूपं तु तेषां परिवर्तितं भवत्येव । यथा माधुर्यगुणस्य शब्दगतत्वे स्वरूपं निरूपयन्नाचार्यो वामनः प्राह– "पृथक्पदत्त्वं माधुर्यम्" इदं तु तदैव भवितुमर्हति यदा वाक्ये दीर्घसमासानामभावः स्यात् । किन्तु अर्थगतस्य माधुर्यगुणस्य विषये आचार्यो वामनः प्रावोचत् ट्ट उक्तिवैचित्र्यं माधुर्यम् अर्थस्योत्कर्षप्रदर्शनाय सामान्यप्रकारापेक्षया भिन्नप्रकारं वस्तुवर्णनमस्य गुणानामावश्यकं भवति । अस्य गुणस्योदाहरणभूतो निम्नाङ्कितः श्लोको वर्तते –

रसवदमृतं कः सन्देहो मधून्यपि नान्यथा
मधुरमधिकं नूतस्यापि प्रसन्नरसं फलम् ।

[1] नाट्यशास्त्रे

सकृदपि पुनर्मध्यस्थः सन् रसान्तरविज्जनो
वदतु यदिहान्यत् स्वादु स्यात् प्रियादशनच्छदात् ॥[१]

अस्य कथनस्यैतावन्मात्रमभिप्रायो वर्तते यत् प्रियतमाया अधररस एव स्वादुतमो भवति । किन्त्विममेवार्थमभिव्यञ्जयितुं भङ्ग्यन्तरं स्वीचकारात्र कविः । गुणानां सङ्ख्याविषये वामनस्येदं विशेषणम् अन्ये आलङ्कारिकाः नहि स्वीचक्रुः । आचार्यो भामहस्तु दण्डिनः पूर्वमेव तु ओजःप्रसादमाधुर्यख्यानां त्रयाणां गुणानां कल्पनामकार्षीत् । मम्मटहेमचन्द्र–विश्वनाथादिका अपि गुणत्रयवादस्यैव समर्थनमकार्षुः । मम्मटो विश्वनाथश्च स्वकीये स्वकीये काव्यशास्त्रीये ग्रन्थे वामनोक्तानां दशानामर्थगुणानां दशानां शब्दगुणानाञ्च अन्तर्भावं त्रिषु एव गुणेषु प्रदर्शयामासतुः ।

सरस्वतीकण्ठाभरणकारो भोजराज एव केवलं गुणानां विषये वामनस्यानुगमनमकरोत् । भोजराजो गुणानां विभागत्रयं करोति – बाह्यगुणः, आन्तरगुणः, वैशेषिकगुणाश्च । सः गुणानां सङ्ख्यापि चतुर्विंशतिः स्वीकरोति ।
रीते प्राचीनं नाम मार्गो वर्तते । भामहात् पूर्वं वैदर्भमार्गः सर्वगुणाश्रयरूपेण स्वीक्रियते स्म गौडीयमार्गश्च निन्दनीय आसीत् । अस्याः विचारधारायाः खण्डनमकार्षीत् आचार्यो भामहः काव्यालङ्कारग्रन्थे । तेनाभिहितं यत् – न तु वैदर्भमार्गस्य प्रशंसा करणीया न वा गौडीयमार्गस्य निन्दा करणीया । सर्वापेक्षया गुणेषु ध्यानं देयम् ते च गुणाः सन्ति– काव्यस्य वक्रोक्तियुक्तता, पुष्टार्थता, अग्राम्यता, अर्थसम्पन्नताप्रभृतयः । इमे गुणा यत्र भविष्यन्ति तत्रैव कमनीयकाव्यता स्यात्, न तु मार्गभेदेन कमनीयकाव्यता भवति । तथापि –

---

[1] सरस्वतीकण्ठाभरणे १/११०

वैदर्भमन्यदस्तीति मन्यते सुधियोऽपरे ।
तदेव च किल ज्यायः सदर्भमपि नापरम् ॥
गौडीयमिदमेतत् तु वैदर्भमिति किं पृथक् ।
गतानुगतिकन्यायान्नानाख्येयममेधसाम् ॥
न चाश्मकवंशादि वैदर्भमिति कथ्यते ।
कामं तथास्तु प्रायेण संज्ञेच्छातो विधीयते ॥
अपुष्टार्थमवक्रोक्ति प्रसन्नमृजु कोमलम् ।
भिन्नं गेयमिवेदं तु केवलं श्रुतिपेशलम् ॥
अलङ्कारवदग्राम्यमर्थ्यं न्याय्यमनाकुलम् ।
गौडीयमपि साधीयो वैदर्भमिति नान्यथा ॥[१]

वैदर्भी, गौडीया, लाटिति तिस्रो रीतयः स्वीक्रियन्ते । इमानि नामानि नूनं तान् तान् देशभेदानाश्रित्य सञ्जातानि । देश–भेदेन रीतिभेदस्वीकारे रीतिनामानन्त्यं स्यादिति प्राहाचार्यः कुन्तको वक्रोक्तिजीविताभिधाने काव्यशास्त्रगन्थे भोजराजस्तु देशभेदमेवाश्रित्य रीतीनां षाड्विध्यं प्रतिपादयामास । भोजानुसारेण रीतयो निम्नाङ्किता भवन्ति– वैदर्भी, गौडी, पाञ्चाली, लाटी, आवन्ती, मागधी चेति । भोजराजः षण्णां रीतीनां नामनिर्देशं त्वकार्षीत्, किन्तु तेषामन्तरं नहि स्पष्टिचकार सः । वामनः अलङ्काराणां गुणेभ्यः पार्थक्यं स्वीकृत्य तेषां विशदं विवेचनमकार्षीत् ।

[1] काव्यालङ्कारे १/३१–३५

रीतेर्महत्त्वम् –

अलङ्कारसम्प्रदायापेक्षया रीतिसम्प्रदाये काव्यसिद्धान्तानामधिको विकासः समभवत् । आचार्य आनन्दवर्धनः प्रावोचत् काव्यतत्त्वस्य यथार्थवर्णने असमर्थाः सन्तो रीतिसम्प्रदायस्याचार्याः रीतीनां प्रवर्तनम् अकरोत् । तथाहि –

अस्फुटस्फुरितं काव्यतत्त्वमेतत् यथोदितम् ।
अशक्नुवद्भिर्व्याकर्तुं रीतयः सम्प्रवर्तिताः ॥[१]

यद्यपि श्लोकोऽयं रीतिसम्प्रदायस्य निन्दारूपं आभाति किन्तु अत्र रीतिसम्प्रदायस्य प्रशंसैव कृता वर्तते । आनन्दवर्धनाचार्यस्याभिप्रायो वर्तते यत् रीतिसम्प्रदायस्य निरूपणे काव्यतत्त्वं स्फुरितं तु किन्तु तथाविधं स्फुटं नाभूत् यादृशं ध्वनिसम्प्रदाये ।

वामनेन प्रतिपादितं रीतेः काव्यात्मत्वं यद्यपि परिवर्तिनः आचार्याः नहि स्वीचक्रुः किन्तु ते रीतिं काव्यस्योपादेयाङ्गरूपेण स्वीकृतवन्तः इति सिद्धान्तं मान्यं कृत्वा ध्वनिना साकं रीतेः सामञ्जस्यं संस्थापयामासुः ।

आचार्यः कुन्तको रीतेरन्यानि नामानि स्वीकरोति । कुन्तकमतानुसारेण रीतिशब्दवाच्या मार्गाः त्रयः सन्ति – १. सुकुमारमार्गः– अयं मार्गः वैदर्भ्याः अपरपर्यायभूतो वर्तते । २. विचित्रमार्गः – अयं मार्गः गौडीरीतेरपरपर्यायभूतः । ३. मध्यममार्गः – अयं मार्गः पाञ्चाल्या अपरपर्यायभूतो वर्तते । एतेषु त्रिषु मार्गेषु सः नवीनानां चतुर्णां कल्पनामकरोत् । ते च गुणाः सन्ति – माधुर्यगुणः, प्रसादगुणः, लावण्यगुणः, आभिजात्यगुणश्च ।

[1] ध्वन्यालोकः ३/४७

अनेन विवेचनेन अयमर्थः स्पष्टो जातो यत् काव्यशास्त्रस्य ऐतिह्ये भामहपूर्वकालादारभ्य अस्यान्तं यावत् रीतेरेकं महत्त्वपूर्णं स्थानमास्ते ।

(घ) ध्वनिसम्प्रदायस्य वर्णनम्

काव्यशास्त्रस्य ऐतिह्ये ध्वनिसम्प्रदायस्य स्थानमतीव गौरवपूर्णमास्ते । अस्य सम्प्रदायस्याचार्याः ध्वनितत्त्वस्योद्भावनां कृत्वा काव्यस्यातिमहत्त्वपूर्णस्य तत्त्वस्य विवेचनमकरोत् । एतस्मात् पूर्वं यावत् येषां काव्यसिद्धान्तानां विकासः समभवत् तेषां समेषां सिद्धान्तानां ध्वनिना साकं सामञ्जस्यसंस्थापनमस्य सम्प्रदायस्याचार्याणाम् अति महत्त्वपूर्णं कार्यमासीत् । ध्वनिसम्प्रदायस्य संस्थापक आचार्यानन्दवर्धनो वर्तते । आनन्दवर्धनाचार्यस्य वैक्रमाब्दस्य नवमात् शताब्दारभ्य इदानीं यावत् सहस्रवर्षपर्यन्तं ध्वनिसिद्धान्तस्यैव वर्चस्वमास्ते । यद्यपि प्रतिहारेन्दुराज–कुन्तक–भट्टनायक–महिमभट्टप्रभृतयः अनेके प्रकाण्डाः पण्डिताः अस्य सिद्धन्तस्य विरोधम् अकुर्वन् किन्तु तेन कृतेन विरोधेन नापहीयते स्म किमपि ध्वनिसिद्धानतस्य, अपि तु अस्य वर्चस्वं वर्द्धते स्म एव । यत्र वाच्यादर्थादधिकचमत्कारी अर्थविधेषकोऽभिव्यज्यते तत्र भवति ध्वनिकाव्यम् –

इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः ।[१]

मुख्यतयार्थस्य द्वै भेदौ भवतः – वाच्यार्थः प्रतीयमानश्च । तत्र वाच्यार्थे अलङ्कारादिकाः समाविधन्ति, प्रतीयमानार्थे च ध्वनिनां भेदा आयान्ति । प्रतीयमानस्यार्थस्य सिद्धिः काव्ये वस्तुसंस्थितेः अवलोकयित्रुभ्यः सर्वेभ्यो सहृदयेभ्यो भवति । आनन्दवर्धनाचार्येण तु अभिहितम् –

[1] काव्यप्रकाशे १/४

प्रतीयमानं पुनरन्यदेवं वस्त्वस्ति वाणीषु महाकवीनाम् ।

यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥[१]

अलङ्कारशास्त्रस्येतिहासे ध्वनेः कल्पना समालोचकानां सूक्ष्मेकाया एव परिणामस्वरूपाऽभूत् । लक्ष्यग्रन्थेषु तु ध्वनिरवर्त्तत एव किन्तु आनन्दवर्धनाचार्यात् प्राक् केनापि समालोचकेन ध्वनिं काव्यस्य महनीयतत्त्वरूपेण नहि कल्पनाक्रियते स्म ।

आनन्दवर्धनाचार्यस्यैवेयं महती मनीषा वर्तते यत् सः ध्वनिनामकं काव्यतत्त्वमन्येभ्यः काव्यतत्त्वेभ्यः पृथक् संकृत्य तस्य स्वतन्त्रां सत्तां संस्थापयामास । यद्यपि व्यास–वाल्मीकि–कालिदासप्रभृतीनां महतां कवीनां काव्येषु ध्वनेस्तु साम्राज्यमेवास्ते, किन्तु तेभ्यः सर्वेभ्यः पृथक्कृत्य तस्य काव्यस्य पृथक्तत्त्वरूपेण स्वीकरणम् आनन्दवर्धनाचार्यस्यैव प्रतिभायाः कार्यं भवितुमर्हति । अत एव आलोचनाया इतिहासे ध्वनिसम्प्रदायस्य अति गौरवात्मकं स्थानमास्ते ।

आनन्दवर्धनाचार्यस्य शतवर्षाणान्तरं ध्वन्यालोकलोचनस्य प्रणेता ध्वनितत्त्वस्य दृढं समर्थनं कृत्वा अस्मिन् सञ्जातानां सर्वेषाम् अपेक्षाणां समाधानमकरोत् । आचार्यो मम्मटः अभिनवगुप्तपादाचार्यस्यानन्तरं स्वकीये काव्यप्रकाशे ध्वनिसिद्धान्तस्य पूर्णतया व्यवस्थितं रूपं संस्थापयामास ।

ध्वनितत्त्वस्य कल्पनाया विषये साहित्यिका वैयाकरणानां कृतज्ञाः सन्ति । वैयाकरणाः आलङ्कारिकेभ्यः प्रागेव स्फोटतत्त्वस्य कल्पनां कृतवन्तः । तस्मात् स्फोटदेव प्रेरणां प्राप्यालङ्कारिकाः ध्वनेः कल्पनां कृतवन्तः ।

---

[1] ध्वन्यालोकः १/४

अयं ध्वनिसिद्धान्तो रससिद्धान्तस्यैव विशदीकरणमाभाति । येन प्रकारेण रसः सर्वदा व्यङ्ग्य एव भवति न जातु वाच्यतां याति, तेनैव प्रकारेण ध्वनिरपि व्यङ्ग्य एव भवति न तु कदाचिदपि अस्य वाच्यतां भवति । आनन्दवर्धनाचार्येण तु स्पष्टतयैवाभिहितम् –

"अयमेव हि महाकवेर्मुख्यो व्यापारो यत् रसादीनेव मुख्यतया काव्यार्थीकृत्य तद्व्यक्त्यनुगुणत्वेन शब्दानामर्थानाञ्चोपनिबन्धनम् । एतच्च रसादितात्पर्येण काव्यनिबन्धं भरतादावपि सुप्रसिद्धमेवेति । ---- रसादयो हि द्वयोरपि तयोः (काव्यनाट्ययोः ) जीवितभूताः" ।[1]

ध्वनिशब्दस्य व्युत्पत्तिः

ध्वनिशब्दस्य व्युत्पत्तिरनेकभावेन सह भूता ।

प्रथमप्रकारेण – ध्वनति ध्वनति वा यः स ध्वनिः इति कर्तृव्युत्पत्याधारेण व्यञ्जकः शब्दः अर्थश्च ध्वनिः ।

द्वितीयप्रकारेण – कर्मव्युत्पत्यानुसारेण ध्वन्यते यः स ध्वनिरिति व्यङ्ग्यरसाः रस–रसाभास–भाव–भावाभास–भावोदय – भावप्रशम – भावसन्धि–भावशवलताः एतेषां व्यङ्ग्यरसादीनां व्यङ्ग्यालङ्कारः व्यङ्ग्यवस्तु च ध्वनिः ।

तृतीयपद्धत्या – व्युत्पत्तिरियं वर्तते – ध्वनति ध्वनति वा अनेनेति करणव्युत्पत्या शब्दार्थयो व्यञ्जनाव्यापरो ध्वनिः ।

चतुर्थप्रकारेण– ध्वनति ध्वन्यते वा अस्मिन्निति अधिकरणव्युत्पत्या ध्वनिः काव्यम् ।

आचार्य आनन्दवर्धनो ध्वनिं त्रेधा विभाजयति –

---

[1] ध्वन्यालोके

१. रसध्वनिः

२. अलङ्कारध्वनिः

३. वस्तुध्वनिश्च ।

तत्र रसध्वनौ केवलं रसानामेव गणना नहि क्रियते अपि तु तत्र भावानां, तदाभासानां, भावोदयस्य, भावशबलताया भावसन्धेश्च गणनां कृता स एव रसध्वनिः भवति । यत्र केवलस्य तथ्यकथनमात्रस्यैव अभिव्यञ्जनया क्रियते तत्रैव भवति वस्तुध्वनिः । यत्र अभिव्यज्यमानोऽर्थः इतिवृत्तात्मको नहि भवति अपि तु कल्पनाप्रसूतो भवति । एतेषु त्रिषु ध्वनिभेदेषु रसध्वनिरेव शेखरायते । क्रौञ्चवधादेव हेतोः क्रौञ्च्याः करुणं क्रन्दनं निशम्य महाकवेर्वाल्मीकेः हृदये यः शोकस्य प्रवलो भावो जागृतो बभूव स एव श्लोकरूपेण प्रकटीबभूव । अयमेवास्ते रसध्वनिः । महत्त्वपूर्णत्वादेव रस एव काव्यस्यात्मा भवति । वस्तुध्वन्यलङ्कारध्वन्योस्तु तत्रान्तर्भावमात्रं भवति । ध्वनेः काव्यस्यात्मत्वकथनं तु सामान्यमास्ते, वस्तुतो रस एव काव्यस्यात्मा भवति । तथा चोक्तं लोचनकारेण लोचनटीकायाम् –

> "तेन रस एव वस्तुत आत्मा । वस्त्वलङ्कारध्वनी तु
> सर्वथा रसं प्रति पर्यवस्येते इति वाच्यात् उत्कृष्टौ तौ
> इत्यभिप्रायेण ध्वनिः काव्यस्यात्मा इति सामान्येनोक्तम्" ।[१]

ध्वनिसम्प्रदायानुसारेण काव्यस्य त्रयो भेदाः सम्भवन्ति –

१. ध्वनिकाव्यम्

२. गुणीभूतव्यङ्ग्यकाव्यम्

---

[1] ध्वन्यालोकः लोचनटीकायाम् पृष्ठ. १२

३. चित्रकाव्यञ्चेति ।

ध्वनिकाव्ये वाच्यापेक्षया प्रतीयमानोऽर्थोऽधिकचमत्कारात्मको भवति । इदमेव सर्वोत्तमं काव्यम् । यत्र काव्ये व्यङ्ग्यार्थपेक्षया न्यूनचमत्कारयुक्तो भवति अथवा वाच्यार्थसदृशचमत्कारयुक्तो भवति तत्र गुणीभूतव्यङ्ग्यकाव्यता आयाति । चित्रकाव्ये तु वाच्यार्थापेक्षया व्यङ्ग्यार्थोऽचरो भवति । इदं काव्यम् अधमकोटिकं भवति ।

रसवादिन आचार्या ध्वनिसिद्धान्तमाश्रित्य गुणालङ्कारयोः काव्ये महत्त्वस्य सम्यङ्निरूपणम् अकुर्वन् । गुणा एव काव्यात्मभूतस्य रसस्य धर्माः सन्ति – माधुर्यौजःप्रसादाख्याः । येन् अप्रकारेण शौर्यवीर्य– पराक्रमादिका धर्मा आत्मन एव कुण्डलादिकाः शरीरमेव भूषयित्वाऽत्मानमलङ्कुर्वन्ति तेनैव प्रकारेण शब्दार्थालङ्कारयमकोपमादीनां शब्दार्थद्वारेण काव्यशोभाकरत्वं भवति । तथा चोक्तमपि आनन्दवर्धनेन–

तमर्थमवलम्बते येऽङ्गिनं ते गुणाः स्मृताः ।
अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत् ॥[१]

अस्याः कारिकायाः वृत्तौ कथितवान् आनन्दवर्धनाचार्यः –

“ये तमर्थं रसादिलक्षणमङ्गिनं सन्तमवलम्बन्ते
ते गुणाः शौर्यादिवत्, वाच्यवाचकलक्षणान्यङ्गानि
ये पुनराश्रितास्ते अलङ्कारा मन्तव्याः कटकादिवत्” ।[२]

---

[1] ध्वन्यालोकः २/६

[2] ध्वन्यालोकः २/६ वृत्तौ

आनन्दवर्धनाचार्यः सङ्घटनायाः त्रीन् भेदान् स्वीकरोति –

१. समासा

२. मध्यसमासा

३. दीर्घसमासा च ।

एतेषु त्रिषु भेदेषु प्रत्येकं रसविशेषमाश्रित्यानुकूलं भवति । सङ्घटनाया औचित्यविचारो रसं, वक्तारं वर्ण्यविषयञ्चाश्रित्य निश्चीयते ।

काव्ये वृत्तीनां द्विप्रकारको भेदो भवति – शब्दवृत्तिरर्थवृत्तिश्च । उपनागरिका, परुषा ग्राम्या चेति त्रिस्रो वृत्तयः शब्दाश्रिताः भवन्ति । कैशिकी, आरभटी, सात्वती भारती चेति चतस्रो वृत्तयो वाच्यार्थमाश्रित्य भवन्ति । रसानुजूलतां गता एव वृत्तयः काव्यानाव्ययोः शोभावहा भवन्ति । रसप्रतिकूलत्वेन तासां विधानं काव्ये कदापि नहि करणीयं भवति ।

ध्वनिवादिनामाचार्याणामनुसारेण मुख्यार्थापहतित्वमेव दोषसामान्यलक्षणम् । इत्थं ध्वनिवादिन आचार्याः ध्वनिमेव काव्यस्य मुख्यतत्त्वरूपेण स्वीकृतवन्तः इति ।

(ङ) वक्रोक्तिसम्प्रदायस्य वर्णनम्

संस्कृतवाङ्मये वक्रोक्तिशब्दस्य प्रयोगोऽअतिप्राचीनादेव कालात् प्रावृत्तो वर्तते इत्यवलोक्यते । कादम्बरीकारो बाणभट्टो निम्नाङ्कितवाक्ययोः परिहासकथाया अर्थे वक्रोक्तिशब्दस्य प्रयोगमकरोत् । तथाहि –

१. वक्रोक्तिनिपुणेन विलासिजनेन ।

२.एषापि बुध्यते एव एतावतीः वक्रोक्तीः ।

अमरुशतककारोऽपि वक्रोक्तिशब्दस्यास्मिन्नेवार्थे प्रयोगं अकरोत् । तद्यथा द्व

या पत्युः प्रथमापराधसमये सख्योपदेशं विना ।

नो जानाति सविभ्रमाङ्गवलना वक्रोक्तिसंसूचनम् ॥[1]

वक्रकथनमेव वक्रोक्तिशब्दस्य सामान्यर्थः । प्राचीनादेव कालादालङ्कारिकाः कस्यचनातिशयकथनस्य सत्तां स्वीकृतवन्तः । सामान्यजनकथनप्रकाराद्भिन्नेन प्रकारेण कथनमेव वक्रोक्तिशब्देनाभिधीयते । ऐतिहासिक्या दृष्ट्या अलङ्कारशास्त्रे सर्वप्रथमं वक्रोक्तेः कल्पनां भामह अकरोत् । भमहानुसारेण वक्रोक्तिरतिशयोक्तेर्नामान्तरमात्रमास्ते । सः वक्रोक्तिमेव काव्यस्य मूलतत्त्वरूपेण स्वीकरोति । अत्राचार्यभामहेन निगदितम् –

सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते ।

यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ॥

काव्ये वक्रोक्तेरेवोपादेयतामङ्गीकृत्य भामहो हेतुसूक्ष्मलेशाख्यानलङ्कारान् नहि स्वीकरोति । तथाहि –

हेतुश्च सूक्ष्मो लेशोऽथ नालङ्कारतया मतः ।

समुदायाभिधानस्य वक्रोक्त्यनभिधानतः ॥

भामहानुसारेण अलङ्कारत्वाय वक्रोक्तेः स्थितिः अनिवार्या भवति । नहि भवति कश्चनाप्यलङ्कारो वक्रोक्तिं विना –

वाचां वक्रार्थशब्दोक्तिररङ्काराय कल्पते ।

आचार्यो दण्डी सम्पूर्णमेव वाङ्मयं भागद्वये विभाजयति – स्वभावोक्तिरूपेण वक्रोक्तिरूपेण च । स्वभावोक्तौ तेषां काव्यानामन्तर्भावो भवति

---

[1] साहित्यदर्पणे पृष्ठ. १७९

येषु वस्तूनां स्वरूपयाथाम्यं भवति वर्णितम् । काव्यादर्शे आचार्यो दण्डी स्वभावोक्तिमेव जातेरपरपर्यायभूतेनाद्येनालङ्कारनाम्नाऽभिधीयते ।

स्वभावकथनाद् भिन्नादेव वक्रोक्तौ अतिशयकथनस्य समावेशः क्रियते । इत्थमुपमादिका अर्थालङ्कारा रसवदादिका रससम्बद्धा अलङ्कारा वक्रोक्तावेव समाविशन्ति । दण्ड्यनुसारेण श्लेषस्य सत्तया वक्रोक्तिरत्यधिकं परिपुष्टा भवति । तथा च –

श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम् ।
भिन्नं द्विधा स्वभावोक्तिर्वक्रोतिश्चेति वाङ्मयम् ॥[1]

भामहेन कृतं वक्रोक्तिकल्पनां स्वीचकार दण्डी, किन्तु भामहानुसारेण वक्रोक्तिः सर्वेषामलङ्काराणां मूलमासीत् किन्तु दण्डी वक्रोक्तिं स्वभावोक्तेः क्षेत्रत् पृथक् चकार । वामनेन स्वीकृतायाः वक्रोक्ते रूपं भामहप्रदर्शितात् वक्रोक्ते रूपान्नितरां भिद्यते । भामहो वक्रोक्तिं सर्वेषामलङ्काराणां मूलरूपेणाभ्युपगच्छति स्म किन्तु वामनः ताम् अर्थालङ्कारविशेषरूपेण वक्रोक्तिमभ्युपैति । वामनानुसारेण वक्रोक्तिः सादृश्यमूला लक्षणैवास्ते । रुद्रटो वक्रोक्तिं शब्दालङ्कारविशेषरूपेणाभ्युपगच्छति । यदा कस्यचन भिन्नार्थं शब्दं श्रुत्वा श्रोतस्यावाञ्छितमकल्पितञ्चोत्तरं ददाति तदा रुद्रटानुसारेण वक्रोक्तिर्भवति । यथा–

अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता ।

इति कस्यचन वाक्यं श्रुत्वा “त्रिविधा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्”। इत्युत्तरप्रदानं वक्रोक्तिरेवास्ते । किन्तु कुन्तकस्य वक्रोक्तिरेतेभ्यः सर्वेभ्यो व्यतिरिच्यते । सः वक्रोक्तिं काव्यस्य मूलतत्त्वरूपेण स्वीकरोति –

---

[1] काव्यादर्शः पृ. २८१

वैदग्धी भङ्गीभणितिः" । एतदेव वक्रोक्तेर्लक्षणम् । कस्यचनापि वस्तुनोऽलौकिकेन प्रकारेण कथनमेव वक्रोक्तिरित्यभिधीयते ।

इत्थं भामहेन स्वीकृता वक्रोक्तिः वामने सादृश्यमूला लक्षणा बभूव, रुद्रटे शब्दालङ्कारविशेषस्वरूपा कुन्तके च काव्यस्य मूलतत्त्वस्वरूपा । यस्मात् कारणात् कुन्तको वक्रोक्तिमेव काव्यात्मारूपेण स्वीकरोति अत एव तस्य ग्रन्थस्य नाम वक्रोक्तिजीवितं सञ्जातम् । कुन्तक एव वक्रोक्तिसम्प्रदायस्य संस्थापको वर्तते। स्ववैशिष्ट्यविशेषादेव कुन्तकः आनन्दाभिनवगुपतयोः कोटावाटीकते । कुन्तको रसध्वनिभ्यां पूर्णतया परिचित आसीत् किन्तु सः तयोरन्तर्भावं वक्रिक्तावेववाकरोत् ।

कुन्तको वक्रोक्तेः षड् भेदान् करोति । ते च भेदाः सन्ति – वर्णवक्रता, पदपूर्वार्धवक्रता, पदोत्तरार्धवक्रता, वाक्यवक्रता, प्रकरणवक्रता प्रबन्धवक्रता च । आचार्यः कुन्तकः उपचारवक्रतायां ध्वनेर्नैकेषां भेदानामन्तर्भावमकार्षीत् । कुन्तककृताया वक्रोक्तेः कल्पना तथाविधौदार्यपूर्णा व्यापका च वर्तते येन श्वनेः सर्वे भेदा अत्रैव समाविशन्ति । कुन्तकस्य विवेचनात्मिका विश्लेषणात्मिका च शक्तिरतीव महत्त्वपूर्णा वर्तते । तेन प्रणीतं वक्रोक्तिजीवितं मौलिकानां विचाराणां निधानमिवास्ते ।

ध्वनिवादिन आचार्याः वक्रोक्तिं काव्यात्मारूपेण तु नहि स्वीकृतवन्तः किन्तु वक्रोक्तेरनेकान् प्रकारान् ध्वनावन्तर्भावं कृत्वा वक्रोक्तेर्महत्त्वमङ्गं चक्रुः । पाश्चात्या अपि समालोचका वक्रोक्तेर्महत्त्वं स्वीकुर्वन्ति । किन्तु सर्वापेक्षया वक्रोक्तेर्विशदं विवेचनं कुन्तक एव अकार्षीत् ।

(ङ) <u>औचित्यसम्प्रदायस्य वर्णनम्</u>

संस्कृतलोचनस्य जगतो महदवदानमास्ते औचित्यतत्त्वम् । अयं साहित्यशास्त्रस्य व्यापकतमः सिद्धान्तो वर्तते । क्षेमेन्द्र ऐचित्यविचारचर्चानामके ग्रन्थे औचित्यमेव काव्यस्य जीवातुतत्त्वरूपेण संस्थपयामास । किन्तु औचित्यतत्त्वस्य सर्वप्रथमं कल्पना क्षेमेन्द्र एवाकार्षीत् इति वक्तुं नहि शक्यते । औचित्यस्य संस्कृतसाहित्ये कल्पनातीव प्राचीना वर्तते । भरतमुनिप्रणीते नाट्यशास्त्रे तु सिद्धान्तरूपेण तु न हि किन्तु व्यवहाररूपेणौचित्यं विहितमेवास्ते ।

भरतमुन्यनुसारेण लोक एव नाट्ये प्रमाणम् । लोके यद् वस्तु येन रूपेण येन वेषेण यया मुद्रया च समुपलभ्यते तस्य वस्तुनः तेनैव रूपेण, तेनैव वेषेण तयैव च मुद्रया अनुकरणं नाट्यस्य चरमं लक्ष्यम् । एतस्मादेव कारणात् नाट्यशास्त्रं प्रकृतेः भाषावेषादीनां विधाने अत्यधिकं बलं ददाति ।

सामान्यतया प्रकृतयस्त्रिप्रकारवत्यो भवन्ति – दिव्या प्रकृतिः, अदिव्या प्रकृतिः, दिव्यादिव्या च प्रकृतिः । एतेषां त्रयाणामपि स्वभावे मूलतो वैलक्षण्यं भवति । रङ्गमञ्चोपरि एतेषां यथार्थं विधानमेव नाट्यकारस्य कलायाः चरमो विकासो भवति ।

दिव्यप्रकृतेः कार्याणां प्रदर्शनमदिव्यप्रकृतौ कदापि नहि प्रदर्शयितुं शक्यते । अनेकेष्वध्यायेषु भरतमुनिः अस्यैव विषयस्य विस्तारेण चर्चामकार्षीत् । एतेनायमर्थं स्पष्टो भवति यत् भरतमुनिः औचित्यनिर्वाहस्य परमः समर्थकोऽसीत् । काव्येषु औचित्यतत्त्वस्य कल्पनाया मूलम् इदमेवास्ति । तथा च उक्तम् अस्मिन् विषये भरतमुनिना –

अदेशयुक्तो वेषो हि न शोभां जनयिष्यति ।

मेखलोरसि बद्धा हास्यं समुपादयेत् ॥[१]

औचित्यस्य सर्वमान्य आचार्यः आचार्यः आनन्दवर्धनाचार्यः एव वर्तते । स एव काव्ये गरिम्णः पूर्णतया विवेचनं अकरोत् । रसभङ्गस्य व्यख्यायाअ अवसरे आनन्दवर्धनेनाभिहितम् –

अनौचित्यादृते नान्यद्रभङ्गस्य कारणम् ।

औचित्योपनिबन्धस्तु रसस्योपनिषत्परा ॥[२]

आनन्दवर्धनाचार्यस्य व्याख्याकार आनन्दवर्धनाचार्यः तेषां काश्मीराणामालोचकानां तीक्ष्णं प्रत्यख्यानमकरोत्, ते ध्वनिसिद्धान्तसम्पर्कं विहायैवौचित्यस्य पक्षपातिन आसन् । अभिनवगुप्तेनापादितं यत् ध्वनिं विनौचित्यसिद्धान्तस्य प्रतिष्ठा भवितुमेवनार्हति । अत एव ध्वन्यौचित्यसिद्धान्तयोः परस्परम् उपकार्योपकारकभावो वर्तते ।

अभिनवगुप्तस्यैव एकः प्रमुखः शिष्यः क्षेमेन्द्रो वर्तते । सह् स्वयमेव श्वनिवाद्यासीत् तथापि औचित्यविचारचर्चाभिधस्य ग्रन्थस्य माध्यमेन सः औचित्यस्य सिद्धान्तं पूर्णतया काव्ये प्रतिष्ठाप्तवान् । स्वरूपं निरूपयन् आचार्यः क्षेमेन्द्रः औचित्यविचारचर्चायां अवोचत् –

उचितं प्राहुराचार्याः सदृशं किल यस्य यत् ।

उचितस्य च यो भावस्तदुचित्यं प्रचक्षते ॥[३]

इदमौचित्यं रसस्य जीवितमास्ते । यथा चोक्तं क्षेमेन्द्रेण –

---

[1] नाव्यशास्त्रे २१/६९

[2] ध्वन्यालोकः ३/१४ वृत्ति

[3] औचित्यविचारचर्चा पृ. ७

औचित्यस्य चमत्कारकारिणश्चारुचर्वणे ।

रसजीवितभूतस्य विचारं कुरुतेऽधुना ॥[1]

क्षेमेन्द्रः अस्यौचित्यस्य नैकान् भेदान् करोति स्म – पदौचित्यम्, वाक्यौचित्यम्, अर्थौचित्यम्, रसौचित्य, कारकौचित्यम्, लिङ्गौचित्यम्, वचनौचित्यमित्यादिकानां नैकेषाम् औचित्यभेदानां निरूपणं क्षेमेन्द्रस्तत्र तत्राकरोत् । तद्यथा –

अपसारय घनसारं कुरु हारं दूर एव किं कमलैः ।

अलमलमालि मृणालैरिति वदति दिवानिशं बाला ॥[2]

अस्मिन् पद्ये विप्रलम्भशृङ्गाररसो वर्तते । अस्य पद्यस्य पूर्वार्द्धे रकारस्यानुप्रासः उत्तरार्द्धे च लकारस्यानुप्रासः इमावुभावेव विप्रलम्भशृङ्गारं पर्पोषयतः । लकारबहुला प्रयोगा गलितप्रायाणां पदानां विन्यासश्च इप्रलम्भशृङ्गारस्य परिपोषका भवन्ति ।

एनाभिहितं यत् कर्पूर्मञ्जर्यां विप्रलम्भशृङ्गारात्मके निम्नाङ्कितेे टकारबहुले पद्ये औचित्यमेवास्ते । तथा च पद्यम् –

चित्ते विहट्ठदि ण टुट्टदि सा गुणेसुं । सेज्जासु लोट्टदि विसट्टदि दिमुहेसं ॥

बोलम्बि बट्टदि पवट्टदि कव्वबंधे । झाणेन टुट्टदि चिरं तरुणी तरट्टी ॥[3]

अनेन प्रकारेणाचार्यः क्षेमेन्द्रो व्यवस्थितं रूपं प्रदर्शयामास काव्यशास्त्रे औचित्यस्य । किन्तु क्षेमेन्द्र एव औचित्यस्य गवेषको नास्ति ।

---

1 औचित्यविचारचर्चा पृ. २

2 औचित्यविचारचर्चा

3 कर्पूरमञ्जर्याम्

आनन्दवर्धनभरतमुनिभ्यामाचार्यः क्षेमेन्द्रः स्वसामग्र्याः सङ्कलमकरोत् । क्षेमेन्द्रोपदर्शिताः समे औचित्यभेदा ध्वन्यालोके विद्यमानाः सन्ति । औचित्यस्य समर्थने यत् क्षेमेन्द्रेण निम्नाङ्कितं पद्यमभिहितं तद् भरतमुनेर्व्याख्याभूतमास्ते । तथा च क्षेमेन्द्रपद्यम्–

कण्ठे मेखलया नितमफलके तारेण हारेण वा,
पाणौ नुपुरबन्धनेन चरणे केयूरपाशेन वा ।
शौर्येण प्रणते रिपौ करुणया नायान्ति के हास्यता–
मौचित्येन विना रुचिं प्रतनुते नालङ्कृतिर्नो गुणाः ।[१]

-----------------

[1] औचित्यविचारचर्चा कारिका ६